CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्री

श्रीमन्महाराज संस्कृत महापाठशाला पत्रिका

(त्रैमासिकी)

सम्पुटम् २६] 1950 Sept. and Dec. [सञ्चिके ३-४

विकृति—शारदी-हैमन्ती

मैसूर

राजकीय शाखामुद्रालये सम्मुद्रिता

१९५२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

R. S. Sharma.
Acc. 612.

विज्ञप्तिः

श्रीमन्महाराज संस्कृतमहापाठशालीय त्रैमासिक पत्रिकायाः वार्षिकमग्रिमं मूल्यं बहुभिः ग्राहकमहाशयैः बहुलं दातव्यशेषमास्ते। अतः पत्रिकाप्रकाशनमेव महाश्रमोदर्कं संवृत्तम्। मुद्रापणव्ययस्य काकलभृतेश्च सम्प्रति आधिक्येन वार्षिकाग्रिममूल्यस्य बहुलीकरणीयत्वेऽपि पत्रिकाप्रयोजनं सर्वेषां सुलभं भूयादिति मनीषया तथा न विहितम्। एवमपि प्रकृतमूल्यशेषसङ्ग्रहणस्य सत्वरं साधनीयतासंवृत्त्या प्रदेयतच्छेषाः आस्माकीनपत्रिकाग्राहकमहोदयाः एतत्पत्रिकाप्राप्तेरनुपदमेव स्वीयप्रदेयतच्छेषप्रत्यर्पणद्वारा पत्रिकाया अवलम्बनमाकलयेयुरिति विरलेतरविनयेन अभ्यर्थ्यते। यदि निर्दिष्टमूल्यं निःशेषं प्रदेयतदवशेषाः मासादेकस्मात्प्राक् न प्रहिणुयुः न वा प्रत्युत्तरं किमपि प्रापयेयुः तर्हि तेभ्यः भविष्यत्सञ्चिकाप्रेषणादुपरम्येतेति विषयः प्रह्वीभूय विज्ञाप्यते॥

यं. आर्. वेङ्कटसुब्बशास्त्री,
कार्यदर्शी,
पत्रिकासम्पादकीयसमितिः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पादकीयसमितिः

---

१. श्रीमान् प्रोफेसर् सि. आर्. नरसिंहशास्त्री, एम्.ए., विश्रान्तमहाराजकालेज्संस्कृतप्रधानोपाध्यायः.

(अध्यक्षः)

२. साहित्यरत्नं, महाविद्वान् ब्र॥ श्री॥ क. गोपालकृष्णशास्त्री, विश्रान्तमहाराजकालेज्संस्कृतपण्डितः.

३. पण्डितरत्नं, महाविद्वान् ब्र॥ श्री॥ नेरूरु कृष्णाचार्यः विश्रान्तश्रीमन्महाराजसंस्कृतमहापाठशालाव्याकरणप्रधा - नोपाध्यायः.

४. ब्र॥ श्री॥ विद्वान् पा. चन्द्रशेखरभट्टः, महाराजकालेज् संस्कृतपण्डितः.

५. ब्र॥ श्री॥ विद्वान् च. रामचन्द्राचार्यः श्रीमन्महाराजसंस्कृतमहापाठशालामीमांसाप्रधानो — पाध्यायः.

६. धर्माधिकारी, ज्यौतिषरत्नं ब्र ॥ श्री ॥ करूरु शेषाचार्यः विश्रान्त श्रीमन्महाराजसंस्कृतमहापाठशालाज्यौतिषप्रधा- नोपाध्यायः.

(सम्पादकः)

७. श्रीमान् एम्. आर्. वेङ्कटसुब्बशास्त्री, एम्.ए., बि.टि., श्रीमन्महाराजसंस्कृतमहापाठशालाध्यक्षः (कार्यदर्शी).

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विज्ञप्तिः

भो भो महाशयाः! सहृदयाः! सप्रश्रयमिदमिदानीं विज्ञापयामः-संस्कृतविद्याभिमानिनः पुरुषप्रवराः यं कंचन विषयमधिकृत्य संस्कृतभाषामयं अनतिसंक्षिप्तविस्तरं उपक्रमोपसंहारपरिकर्मितं कस्याप्यनुद्वेगकरं अचर्चितपूर्वं कालदेशदशानुगुणं प्रपञ्चोपकारकरं धर्माद्यविरुद्धं "जीर्णमङ्गे सुभाषितम्" इति निर्वेदस्य "वीरा वाचैव केवलम्" इत्यपवादस्य वा प्रशमकरं प्रस्पष्टमुखविलासमुपन्यासं विलिख्य यदि प्रेषयेयुर्महान्तः, तेभ्यो महद्भ्यः समर्प्य अनन्तान् धन्यवादान् पत्रिकायामस्यां तमुपन्यासं पारयामः प्रकाशयितुम् ॥

यदीच्छति वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गाश्चरन्तीर्निवारयेत् ॥
न हीदृशं संवननं त्रिषु लोकेषु विद्यते ।
दया मैत्री च भूतेषु दानं च मधुरा च वाक् ॥

(संपादकस्य)

मूल्यप्रकारः

१. अस्याः पत्रिकायाः वार्षिकम् अग्रिमं मूल्यं सार्धैकरूप्यकम्.
प्रापणव्ययः (भारतमण्डले) .... पादरूप्यकम्.
२. विद्यार्थिनां पुनः एकरूप्यकम्; प्रापणव्ययः ,,
३. विभिन्नदेशे सपादरूप्यद्वयम् (3s.); प्रापणभृतिः अर्धरूप्यकम्.

पत्रिकाप्राप्तिस्थानम् —

अध्यक्षः,
श्रीमन्महाराजसंस्कृतमहापाठशाला, मैसूरु.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सधन्यवादमस्माभिरङ्गीकृता एता विनिमयरूपाः पत्रिकाः

1. संस्कृतसाहित्यपरिषत्पत्रिका, कल्कत्ता
2. उद्यानपत्रिका, तिरुवाडि
3. सूर्योदयः, काशी
4. संस्कृतरत्नाकरः, जयपुरम्
5. वैदिकमनोहरा, काञ्चीपुरम्
6. मधुरवाणी, बेलगाम्
7. मनोरमा, बर्हाम्पुर
8. दि मिथिक् सोसैटि जर्नल्, बेङ्गळूरु
9. दि अन्नल्स् आफ् भण्डार्कर् ओरियेण्टल् रिसर्च् इन्स्टिटयूट्, पूना.
10. जर्नल् आफ् ओरियेण्टल् रिसर्च्, मद्रास्
11. दि ला कालेज् म्यागज़िन्, मद्रास्
12. दि हिन्दु (वारपत्रिका), मद्रास्
13. दि आर्यन् पात्, बरोड
14. दि फिलसाफिकल् क्वार्टर्लि, कल्कत्ता
15. पूना ओरियेण्टालिस्ट्, पूना
16. ब्रह्मविद्या, अड्यार्, मद्रास्
17. दि जैन गेज़ट, अजिताश्रम, लक्नो
18. जर्नल् आफ् दि ट्रावाङ्कोर् यूनिव्हर्सिटि ओरियेण्टल् म्यानुस्क्रिप्टस् लैब्ररि, अनन्तशयन.
19. जैन आण्टिक्वेरि, आर
20. अन्नाल्स् आफ् श्री वेङ्कटेश्वर ओरियेण्टल् इन्स्टिटयूट्, तिरुपति.
21. दि कल्पक, कोयम्बत्तूर्
22. जर्नल् आफ् दि गङ्गानाथ झा रिसर्च् इन्स्टिट्यूट्, अलहाबाद्
23. वर्ल्ड फेडरेषन्, बृन्दावन्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

24. इण्डियन् होम्, बाम्बे
25. दि लैब्रेरि आफ् काङ्ग्रेस् कार्टर्लि जर्नल्, (वाषिङ्ग्टन्) मद्रास्
26. ओरियेण्टल् मेडिसन्, मैसूरु
27. मैसूरु स्टेट् एजुकेषन् लीग् जर्नल्, बेङ्गलूरु
28. सद्बोधचन्द्रिका, आनन्दवन
29. तायिनाडु, (वारपत्रिका), बेङ्गलूरु
30. प्रबुद्धकर्णाटक, मैसूरु
31. विवेकाभ्युदय, मङ्गलूरु
32. विश्वकर्मा, मैसूरु
33. वेदसन्देश, बेङ्गळूरु
34. कर्णाटक हिष्टारिकल् रेव्यू, धारवाड
35. सर्वज्ञसन्देश, बेङ्गळूरु
36. आन्ध्रसाहित्यपरिषत्पत्रिका, कोकनाड
37. राजास्थान भारती, बिकनेर्
38. किशोर भारती, प्रयाग
39. दि. मैसूरु इन्फर्मेषन् बुलेटिन्, बेङ्गलूरु
40. सेवासदन, गुब्बि
41. दि एज्युकेषनल् रेव्यू, मद्रास्
42. बेळकु, मैसूरु (वारपत्रिका)
43. बुलेटिन् फर् लैब्रेरीस्, युनेस्को
44. अस्ट्रलाजिकल् म्यागजीन्, बेङ्गळूरु
45. भारती, जयपुर
46. तरपोरिवालास् इन्डिया लिटररि रेव्यू, बांबे
47. धर्मबोध, उडुपि
48. मल्होत्र, ट्रेड्जर्नल्, न्यू देहलि
49. अमेरिकन् रिपोर्टर्, न्यू देहलि
50. अमृतवाणी बेङ्गळूरु (वार्षिकपत्रिका)
51. जीवन साहित्य, न्यू देहलि

———

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

क्रय्यप्रतपत्रिकाप्रकटनम्

अयि सहृदयाः संस्कृतभाषाप्रणयिमहोदयाः,

सविनयादरमिदमिदानीमावेद्यते भवतां सविधे। श्रीमहीशूरपुरमहाराजसंस्कृतमहापाठशालायामस्यां शराब्धिनवभू (१९४५) मितक्रिस्तशकात्पूर्वं प्रायो विंशतिवत्सरैः संमुद्रितानि प्रतनानि सर्वाण्यपि त्रैमासिकपत्रिकासंपुटानि साम्प्रतं स्वल्पमूल्येन क्रयणार्हाणि सज्जानि वर्तन्ते।

इमानि सरसोपादेयमनोहरविषयगर्भितानि पत्रिकासम्पुटानि गीर्वाणकलाविदुषामितरेषां मेधाविनां पाठशालानां च भृशमावश्यकानि। नात्र स्तोकमात्रोऽपि सन्देहः। समयोऽयं नातिक्रमणीयः सुधीभिः।

त्वरन्तां भवन्तस्तत्संग्रहणाय। प्रोत्साहनीयोऽयमभिसन्धिर्दयालुभिः श्रीमद्भिरित्यभ्यर्थना।

मूल्यक्रमः

		एकस्य सम्पुटस्य	एकस्याः सञ्चिकायाः
विदुषां पाठशालानां च	रू.	० १२ ०	० ४ ०
अन्तेवासिनाम्		० ८ ०	० ३ ०

(पार्थक्येन प्रेषणव्ययः)

सञ्चिकामपेक्षमाणैर्महाभागैर्विलेखनीयो लेखो निर्दिष्टविद्याशालाध्यक्षाय॥

———

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥



श्रीमन्महाराजसंस्कृतमहापाठशालापत्रिका

प्रतिमासत्रयं प्रकटीक्रियमाणा

" कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः "

(ईशोपनिषत्)

सम्पुटम् २६] 1950 Sept. and Dec. [सञ्चिके ३-४
विकृति—शारदी-हैमन्ती

सुभाषितानि

कस्य तृषं न क्षपयसि पिबति न कस्तव पयो निमज्ज्यैतत्।
यदि सन्मार्गसरोवर नक्रो न क्रोडमधिवसति ॥ १ ॥

आगच्छतां च तुच्छानामतुच्छानां च गच्छताम्।
यदध्वनि न संघट्टो घटानां तद्वृथा सरः ॥ २ ॥

विपन्नं पद्मिन्या मृतमनिमिषैर्यातमालिभिः
खगैरप्युड्डीनं रथचरणहंसप्रभृतिभिः।
दशां दीनां नीते सरसि विषमग्रीष्मदिवसैः
कुलीनत्वादास्ते तटरुहतरुः कोऽपि तदपि ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माद्यद्दिग्गजदानदिग्धकरटप्रक्षालनात्क्षोभिता
व्योम्नस्सीम्नि विचेरुरप्रतिहता यस्योर्मयो निर्मलाः ।
कष्टं भाग्यविपर्ययेण सरसः कल्पान्तरस्थायिनः
तस्याप्येकबकप्रचारकलुषं कालेन जातं जलम् ॥ ४ ॥

लक्ष्मीसम्पर्करूपोऽयं दोषः पद्मस्य निश्चितम् ।
यदेष गुणसंदोहधामनीन्दौ पराङ्मुखः ॥ ५ ॥

प्रसारितकरे मित्रे जगदुद्योतकारिणि ।
किन्न कैरव लज्जा ते कुर्वतः कोशसंवृतिम् ॥ ६ ॥

मकरन्दरसस्यन्दिनि पद्मिनि मन्ये तवैव सुभगत्वम् ।
पुष्पवतीमपि भवतीं त्यजति न वृद्धश्शुचिर्हंसः ॥ ७ ॥

न पङ्कादुद्भूतिर्न जडसहवासव्यसनिता
वपुर्दिग्धं कान्त्या स्थलनलिन रत्नद्युतिमुषा ।
व्यधास्यद्दुर्वेधा हृदयलघिमानं यदि न ते
त्वमेवैकं लक्ष्म्याः परममभविष्यः पदमिह ॥ ८ ॥

दीर्घो निदाघसमयो बहुपथिकजनश्च मारवः पन्थाः ।
मार्गस्थस्तरुरेकः कियतां सन्तापमपहरतु ॥ ९ ॥

पान्थाधार इति द्विजाश्रय इति श्लाघ्यस्तरूणामिति
स्निग्धच्छाय इति प्रियो दृश इति स्थानं गुणानामिति ।
पर्यालोच्य महातरो तव घनच्छायां वयं संश्रिताः
धिक्कुत्कोटरवासिनो द्विरसना दूरीकरिष्यन्ति नः ॥ १० ॥

किं जातोऽसि चतुष्पथे घनतरं छन्नोऽसि किं छायया
छन्नश्चेत्फलितोऽसि किं फलभरैराढ्योऽसि किं सन्नतः ।
हे सद्वृक्ष सहस्व संप्रति सखे शाखाशिखाकर्षण-
क्षोभामोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥ ११ ॥

कल्याणं नः किमधिकमितो जीवनार्थं यदस्मान्
लूत्वा वृक्षानहह दहसि भ्रातरङ्गारकार ।
नन्वेतस्मिन्नशनिपिशुनैरातपैराकुलानां
अध्वन्यानामशरणमरुप्रान्तरे कोऽभ्युपायः ॥ १२ ॥

भुक्तानि यैस्तव फलानि पचेलिमानि
क्रोडस्थितैरहह वीतभयैः प्रसुप्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ते पक्षिणो जलरयेण विकृष्यमाणं
पश्यन्ति पादप भवन्तममी तटस्थाः ॥ १३ ॥

गाता कोकिल एव ज्ञाता च रसाल एव नियतमिदम् ।
यः पञ्चममुद्गायति यस्यास्थिषु पुलकमुकुलानि ॥ १४ ॥

उत्तंसकौतुकरसेन विलासिनीनां
लूनानि यस्य न नखैरपि पल्लवानि ।
उद्यानमण्डनतरो सहकार स त्वं
अङ्गारकारकरगोचरतां गतोऽसि ॥ १५ ॥
विशालश्शाखाभिः किमपि कमनीयः किसलयैः
फलैरप्यानम्रः स्तवकमधुगन्धैस्सुरभितः ।
त्वमेवैकः क्षोणीरुहकुलधुरीणोऽसि तदयं
रसाल प्रस्तावादिह हृदि निधेयः पिकयुवा ॥ १६ ॥
भ्रातश्चन्दन किं ब्रवीमि विकटस्फूर्जत्फणाभीषणाः
गन्धस्यापि महाविषाः फणभृतो गुप्तयै यदेते कृताः ।
दैवात्पुष्पफलान्वितो यदि भवानग्रेऽभविष्यत्तदा
नो जाने किमकल्पयिष्यदाधिकं रक्षार्थमस्यात्मनः ॥ १७ ॥

सि. आर्. नरसिंहशास्त्री,
संग्रहीता.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

नव्यखरवत्सरारम्भमङ्गलाशंसनम्

नव्ये श्रीखरवत्सरे नरपतिर्मन्त्री च सौरिर्भृगुः
सेनार्घाम्बुदपो महीसुतरवी सस्यार्घिधान्याधिपौ ।
नृणां चन्द्रगुरू रसारसपती चानामयं तन्वतां
प्राज्यायुर्बहुलं सुखं सुजनतां भक्तिं हरौ च श्रियम् ॥ १ ॥
घस्रेशो लोकबन्धुर्निगममयवपुः कर्मसाक्षी निवासो
लक्ष्मीधाम्नो ग्रहर्क्षादिमकिरणकरस्तेजसां शेवधिः सः ।
लोकात्मा लोकचक्षुः सुरपतिरनघो द्वादशात्मा विधत्तां
साध्वीं वृष्टिं सुभिक्षं गदहतिममितं सम्मदं च प्रजानाम् ॥ २ ॥
कनत्कनकमिश्रणोल्वणमणीघृणिश्रेणिका-
मनोहरकुलक्रमागतमृगेन्द्रपीठाधिपः ।
विराजतु चिरं जयोपपदचामराजप्रभुः
कृपाशिशिरवीक्षया यदुपतेः सजायासुतः ॥ ३ ॥
एवं ज्यौतिषरत्नं नृपगृहधर्माधिकारिपदयातः ।
श्रीखरवत्सरमङ्गलमाशास्ते शेषसूरिकविमौलिः ॥ ४ ॥

एवं मङ्गलाशंसकः

करूरु शेषाचार्यः

ज्यौतिषरत्नं, संस्थानधर्माधिकारी,

विश्रान्तज्योतिश्शास्त्रप्रधानोपाध्यायः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रियै नमः ॥

घटिकोत्सवोपन्यासः.

श्रीविकृतिवत्सरभाद्रशुक्लसप्तम्यामिन्दुदिने १८-९-१९५० सायं पञ्चघण्टावादनावसरे श्रीमहीशूरपुरमहाराज संस्कृतसरस्वती-प्रासाद महापाठशालायाः वाङ्मुखापवरके तच्छालीयासु तिसृषु संस्कृतविद्वदागमिकच्छात्रवार्षिकपरीक्षासु समुत्तीर्णानां परीक्ष्याणामधिसभं बहुमतिविश्राणनावसरे तादृशसभाधीशपदवीमधिरूढैः कर्णाटजनपदीयनिखिलविद्याशालाकार्यप्रधानपर्यवेक्षकैः सुगृहीतनामभिः "के. गुरुदत्त, बि.ए." महोदयैः कर्णाटभाषया सोत्साहं सप्रमाणं मनोहरं चारचितस्य संस्कृतभाषयानूदितस्य घटिकोत्सवोपन्यासस्यायं सङ्ग्रहः ।

तथा हि । प्रेष्ठाः—मद्भाग्योपनतोऽयमिति मन्ये दिवसेऽत्र ममास्याः सभाया आध्यक्ष्योपलम्भः। इदंप्रथमः संवृत्तोऽत्रासावपूर्वः केनचन संदर्भविशेषेण बहुमानवितरणोत्सवः। नव्यसम्प्रदायादप्यागतमिदं घटिकोद्भवावसरे नानापरीक्षासूत्तीर्णानामन्तेवासिनामुपदेशभाषणम् । पुरापीयमुपदेशपद्धतिरवर्तत गुरूणां मुनीनां च स्वाश्रमेषु चिरं निवसतां समभ्यस्तावसितविद्यानां स्वस्वदेशप्रतिष्ठासूनां छात्राणां विषये। एतन्निदर्शनभूता समिन्धे तैत्तिरीयोपनिषदि गुरुभिः कृता शिष्येषूपदेशपारम्परी ।

एतावन्तं कालं बहुषु देशेषु बह्वीषु भाषासु संप्रवृत्तेषु घटिकोत्सवेषु तदङ्गभूतास्तद्भाषासु दरीदृश्यन्ते विरचिता उपदेशाः। यथोपयुयुजिरे विदेश्या ईदृशेऽत्र संदर्भे निजनिजां भाषां तथोपयुयुजुर्भारतीयाः पावनीं कल्याणीं गैर्वाणीं वाणीम् । इयमेकैव भाषास्माकममुत्र परत्र च समये संदुहाना विराजते श्रेयांसि भूयांसि । वाण्यामस्यां बहुषु स्थलेषु तदा तदा प्रकृतेऽत्र महोत्सवे कति कति वोपदेशा व्यरचिषत पण्डितप्रकाण्डैः। तादृशोपदेशसारांशाः सर्वेऽपि वस्तुतस्तैत्तिरीयोपनिषद्यन्तर्गता गुरुकृतशिष्योपदेशवाक्येषु। अतोऽत्र साम्प्रतं श्रोत्रियैः परिपठितं युक्तरूपं सदुपदेशाध्वप्रदर्शिकायां तैत्तिरीयोपनिषदि विराजमानं—"वेदमनूच्या-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चार्योऽन्तेवासिनमनुशास्ती" त्यारभ्य "एवमुचैतदुपास्य" मित्यन्तमुपदेशवाक्यजालम्। इतोऽप्यतिशयितमुपदेशभाषितं न केनापि वक्तुं शक्यम्।

विद्वद्वराः—भवतामग्रे वर्तमानः स्वावगतान्कतिपयान्विषयान्बुबोधयिषुरस्मि न खलु मे तादृशी शक्तिर्भवद्भिरङ्कभाषणौपयिकी। तथापि भवतां प्रभावादेव विकस्वरविषयबोधः सधैर्यं भाषितुं सम्मुखीनोऽस्मि। भाषणावसरे नूनं निवेदनीया नव्यमनोवृत्त्यनुगुणं विषया भावाश्च। तदानुरूप्येणाङ्लभाषापदानि तत्र तत्र प्रयुक्तानि। तच्च क्षमेरन्गुणाभिलाषुका भवन्त इति तत्र प्रयते भृशं विश्वस्तहृदयः।

बहोः कालाद्विद्योतमानेयं महाकलाशाला। पुराभूत्तस्यास्तदभिवर्धनलालसस्य मम च नेदिष्ठः संसर्गः। सम्प्रति तदभावेऽपि दैवादतर्कितोपनतोऽयं भवद्भिः साकं व्यतिकरः। राजगृहे श्रीमहाराजसमज्यायां निर्वर्तनीयोऽयं बहुकालागतो बहुमतिवितरणमहासंभ्रमः। सचेदानीं भाग्यपरिपाकान्मया निष्पादनीयः संवृत्तः। कुत्राप्यदृष्टचरीदृशी विद्याशाला भारतभूतले। सेयं चिरं विराजतामिति भगवन्तमभ्यर्थये। अमोघेन राजाधिराजाश्रयेण विद्वन्मणिसादरसाहायकेन परिपोषिता चेयं कलाशाला चिरकालावस्थिता नूनं समेधेतेति दृढं विश्वसिमि।

नैते साधारणा विद्यार्थिनः परीक्षासुत्तीर्णाः। इमे खलु ज्ञानज्योतिस्सन्धुक्षकाः बोधानुभवनिष्कम्पदीपप्रभाप्रसारकाश्च सन्ति। ईदृशानामाङ्लभाषायां टार्च बेरर्स् (Torch Bearers) इति नाम। अद्यामी छात्राः भाविनि समये पण्डिता ज्ञानशेवधयो देशोद्धारकाश्च भवेयुः। हन्तास्मासु बहोः कालादविच्छेदं प्रवर्तमानोऽप्ययमाजानपावनः प्राक्तनविद्याभ्यासः सम्प्रति विधिदुर्विलसितेन नव्यकलासंस्कृतिभिः परिभर्त्सितो निष्कासितश्च दृश्यते। इदमपीदानीं शुभाधायकमिव प्रतिभाति। नैवं जातुचिदग्रे स्यात्। साम्प्रतं हृदयतोदावहमिव प्रतिभासमानमग्रे सुखोदर्कं स्यात्। तस्माद्भृशं जागरूकैः साम्प्रतिकान्भावनाज्ञानानुभवानप्यवलम्बमानैरस्माभि-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रनवरतमाधेयः प्रयत्नो देशाभ्युदयाय। आस्माकीना प्राक्तनी संस्कृतिरास्ते सनातनधर्मगृहपटलीधुर्यमूलस्तम्भभूता। एतावतापि कालेनाविपर्यस्तेयं संस्कृतिरग्रेऽप्येवंविधैव वर्तितव्या। सर्वथा तस्यास्ताथाविध्यमेव स्वमतिविभवैः संपादनीयं मनीषिमणिभिः। इदमेव सुमेधसां सुतरामावश्यकम्।

यदाहुरभियुक्ताः—

"न देवा यष्टिमादाय रक्षन्ति पशुपालवत्।
यं हि रक्षितुमिच्छन्ति सद्बुध्या योजयन्ति तम्॥" इति।

अतो बुद्धिप्रेरणेनैव गोपनीयं प्रतनं संस्करणम्। नतु पशुपालवद्दण्डेन प्रेरणम्। इदमावेद्यते। एकत्र ज्ञानार्जनमन्यत्र स्वानुभवपूर्वकमवगतार्थप्रचारणं चेति। इदमेव तत्त्वम्। इदमेव कर्तव्यम्।

संस्कृतवाणीप्रणयिनः—अधुना संस्कृतविद्यया किमस्ति प्रयोजनमिति सर्वत्र विसृमरः प्रश्नः श्रूयतेऽस्माभिः। हन्त जनानां शास्त्रेभ्योऽप्यल्पीयसी मान्यतामतिराम्नायेषु। अत्र हेतुः कालविपर्ययेण राजाश्रयवैधुर्यम्। तथापि धैर्यं न त्याज्यम्। महीयसा श्रमेणामरकलां द्वादश त्रयोदश वा हायनान्यधीयानैरस्माभिः किमर्थं करः प्रसारणीयः पञ्चाशत्षष्टिरौप्यमितवेतनादित्सया। मितमेतावदेव फलं यद्युपलभ्येतास्या भाषायास्तर्हीयं विद्या किमर्थमभ्यसनीयेति मा लम्बध्वं नैराश्यम्। मा जहीत तदभ्यसनम्। नार्थाप्तिः फलं विद्यायाः। किन्तु निरतिशयं फलं महीयसी श्रेयसी ज्ञानशक्तिः। इदमेव ज्ञानबल (Knowledge is Power) मित्याक्षते। सर्वथेयमितरकलातिशायिनी खलु सांस्कृती कला। तस्यामास्थेयो महान्प्रयत्नः। आधुनिके तु विद्याभ्यसनक्रमे दरीदृश्यन्ते भूयांसो व्यत्यासाः। यथा वा प्राथमिकाधुनिकयोर्बाष्पगस्पन्दनयोर्विपर्यासाः। मोटार्कार्। अवहितलक्ष्यवेधकल्पो हि प्राक्तनविद्याभ्यासक्रमः। तदन्यथाभूतोऽयं नव्यविद्याभ्यासक्रमः। कालेऽत्र भौतिकगणितशास्त्रादीनामतीव प्राशस्त्यमस्ति। अनेन बहुधा नूनं जीवनौपयिकानि साहायकानि लक्ष्यन्ते। तथापि साम्प्रतममूषां विद्यानामपि शनैश्शनैः समजनि न्यूनः प्रोत्साहः। एवं सति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कथममरकलायाः समुत्तेजनम्। अद्य किञ्चिद्वर्तमानमपि प्रोत्साहनं ध्रुवं हीयते कालक्रमेण। ईदृशेऽस्मिन्काले केचिन्नास्माकमावश्यकः संस्कृतभाषापरिचय इति तं विमुञ्चेयुः। केचन स्वजनकेनारोपितः संवर्धितो न्यग्रोधो न च्छेद्य इति मूढभक्ति (Sentimental Spirit) मनुरुन्धानास्तां भाषामधीयीरन्। तथाप्यमुष्या गीर्वाण-भाषाया इतरभाषाणां च मिथो वर्तमानाः संबन्धप्रभावशक्तयो द्रष्टव्याः।

साधारण्येन व्यावहारिकभाषास्वप्याध्यात्मिकतत्त्वानि विद्योतन्ते। मा भूवंस्तानि पठनमात्रैकपर्यवसायीनि। संस्कृतभारती तु प्रकृतिसुभगा बह्वर्थगभीरा साधुतमा च। तस्यां च पदवाक्यानां स्वरूपाणि स्वरसानि। शैल्यश्च भृशं विमर्शनीयाः। तेष्वपि तत्त्वान्यन्तर्गतानि। नालं केवलभाषाध्ययनम्। किन्तु तद्भाषास्थानामनेकेषां ग्रन्थानां परिशीलनं महते फलाय कल्पते। अथवा केवलमधीतसंस्कृत–तदितरविद्यानामनवलोकिततत्तद्बहुग्रन्थानामप्याप – वर्गिकी काचिदनिर्वचनीया ज्ञानशक्तिरुत्पद्यते।

तदाह श्रीभर्तृहरिर्वाक्यपदीये—

तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।
पवित्रं सर्वविद्यानामधिविद्यं प्रचक्षते" इति॥

प्रशस्ततरेयं सांस्कृती भारती। यतोऽस्यां पारमार्थिकतत्त्वानुभवशक्तिधार्मिकसंस्कृतयस्तिस्रः समुल्लसन्ति। विद्याव्यासङ्गेष्वावश्यकं खलु प्रजाप्रभुत्वम्। केवलमिन्द्रियैरेव ज्ञानमुपजायते। तत्तु पशूनां मनुजानां च समानम्। तथापि तेषां मिथो महदन्तरमस्ति। तच्चास्माभिर्निरूपणीयमास्ते।

तदुक्तं मार्कण्डेयपुराणे—

"ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम्।
यतो हि ज्ञानिनः सत्यं पशुपक्षिमृगादयः"॥ इति।

पशुविहगमानवानां साधारणज्ञानतौल्येऽपि न तेन घटते ज्ञानीति व्यपदेशः। आध्यात्मिकं ज्ञानमेकमेव हि वैशेषिकं ज्ञानम्। तदन्वित एव ज्ञानीति व्यवह्रियते। इन्द्रियैरेव ज्ञानमुपजायत इति प्रायोवादः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यक्षानुमानाभ्यामेव ज्ञानोद्गम इति केचित्। परलोकोऽस्तीत्यास्तिकाः। स नास्तीति नास्तिकाः। किमेभिर्यथोत्तरमुपचितैरवर्जनीयैर्वादप्रतिवादैः। ये वा के वा वादा भवन्तु। वस्तुतोऽस्माकमपेक्षितं यथार्थज्ञानम्। इदं प्रत्यक्षानुमानागमरूपैस्त्रिभिः प्रमाणैरुत्पद्यते। भुवनवद्विशालोऽयं ज्ञानप्रपञ्चः। अत्राप्यतीन्द्रियानुभवोऽस्ति। स तु नात्रास्तीति साधनं केवलं दर्पमूलकम्। तत्कदाप्यविश्वसनीयम्। पूर्वोक्तानुभवसोपानालीमनधिरूढैरस्माभिर्भाव्यम्। तद्धि सीमातिगम्। (Jurisdiction) किमप्युच्चतरं न्यायस्थानमपेक्षितं खलु वादिप्रतिवादिनोरभियोगनिर्णयाय। तथैवाभिलषितं निस्संशयज्ञाननिर्णयौपयिकं किमप्यागमसम्प्रदायानुगं न्यायस्थलम्। तत्रैव (High Court) सर्वेऽपि विषया निर्णीता भवेयुः। परमवधेयोऽयमंशः।

अतीन्द्रियं किमपि तत्त्वमस्तीत्यवबोध एवालम्। तर्हि श्रेयस्येकमारोहणमधिरूढं स्यात्। सर्वेषामादौ श्रद्धाविश्वासावावश्यकौ। तदनन्तरमाधेयः प्रयत्नः। आस्तिकैरागमप्रामाण्यमभ्युपगन्तव्यमेव। अन्यथा ते नास्तिका भवेयुः। अस्माकं वर्तते सत्तारूपो (Sub-conscience) निधिः। आत्मस्वरूपावबोध एव सत्तेति कथ्यते। स च संस्कृतभाषयैव संभाव्यः। स च प्रत्येतव्यः, अन्वेष्टव्यः–यत्नग्राह्यः–यथान्धो दिङ्मूढो विलोकितुमक्षमः किमप्यजानानः प्रसारितकरो निम्नोन्नते पथि धावमानो नूनं यत्र कुत्र वागाधे गर्ते निपतेत्तथा केवलमनुमानप्रमाणमवलम्बमानो विषमं विप्रतिपन्नमर्थं व्यवहरमाणोऽज्ञोऽनर्थमेव लभते। स तु तस्यापरिहार्य एव। अमुमर्थमाह श्रीमान् भर्तृहरिः।

“हस्तस्पर्शादिवान्धेन विषमे पथि धावता।
अनुमानप्रधानेन विनिपातो न दुर्लभः”॥ इति।

न केवलं प्रत्यक्षानुमाने एव मुख्ये प्रमाणे। आभ्यां साधमाध्यात्मिकभाषाप्यपेक्षिता। इदमन्यदप्यस्ति। प्रथमं शब्द एव बोद्धव्यः। नान्ये विषया अपेक्षणीयाः। ते तु शब्दज्ञानेनैव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वतः सुगमाः स्युरिति वैयाकरणानां स्फोटवादः । इति । ततः शास्त्रेऽस्माकं द्रढीयान्विश्वासः स्थेयः । किमर्थं व्याकरणमध्येतव्यम् ? तेन किं फलम् ? तत्र केवलं शब्दजालोच्चारणमिति केचन तन्निराकुर्वन्ति । तेषां अग्रे वक्ष्यमाणमुत्तरं भवति ।

पाश्चात्यैर्विरच्चितान्यगाधानि सन्ति तेभ्यः पूर्वमेवावर्तन्तास्मासु तेषां मूलभूतानि तयोः शोधनानि । शब्दार्थौ द्वौ परस्परं संसक्तावविनाभूतौ च । सर्वथाप्यसाध्यं तयोः पृथक्करणम् । वाक्तत्त्वे चत्वारि रूपाणि विद्योतन्ते तथा च श्रुतयः—

चत्वारि वाक्परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति ॥
यया पश्यन्ति योगिनः ॥ इति ।

रूपाण्येतानि जानन्ति तत्त्वदर्शिनो विपश्चितः । तेषु चतुर्ष्वादितस्त्रीणि बुद्धितत्त्वेऽन्तर्हितानि । तुरीयं तूपयुञ्जते व्यवहारे मनुजाः । केन हेतुनैतानि समुत्पन्नानीत्यवबोधनाय प्रवृत्तं व्याकरणम् । अस्मादेव शब्दार्थावुद्भूतावित्यवगम्यते । तथा सति कारणमवगन्तव्यम् । अत्रास्ति काचन वैखरी क्रियारूपं परं श्रूयते । शब्दवैखरीवार्थवैखर्यप्यास्ते । इयं ज्ञानरूपा सती हृदयमधिवसति । एतदनवरतमननेनैव चतुर्विंशतिः षड्विंशतिर्वा तत्त्वानि विज्ञेयानि । अन्ततः— “ओमित्येकाक्षरं ब्रह्मे”ति तत्त्वानुभवेन भाव्यम् । (Oneness) जगति परिदृश्यमानं सर्वमपि ब्रह्मस्वरूपमिति भावनाभावे न किमपि प्रयोजनम् । एसुक्रिस्त एवं वदति—(Such is the Kingdom of Heaven, submit the children to me) नाकलोकमधिवसतां चित्तवृत्तिः पवित्रा निष्कलङ्का च । तथैवार्भकाणां मनोवृत्तिः । विदुषां मनोभावस्त्वन्यः । अयमहन्तया संश्लिष्टः स्यात् । असावेव कदाचिद्गर्वदर्पादिभिरश्लिष्टः स्यात् इति ।

ऊर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्ययम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवि ''दिति गीतोक्त-प्रक्रियया वाङ्मयमूलं परमात्मैव। अत्राधो महत्तराणि वाङ्मयानि विसारीणि। वाक्तत्त्वमिदं तरुं पर्णानीव गोपायन्ति वेदाः। अस्यापि कदाचिच्छेदनप्रसङ्गः स्यात्। तदा तमभिमानविमोचनासिना छित्वा सदाध्यात्मचिन्तनायां निरता एव विप्रा लभेरन्परमां पदवीम्।

भाषान्तरेष्वविद्यमाना नितरामतिशयिता—आध्यात्मिकी - सत्तात्मिका अनुग्रहकारिका च शक्तिः संस्कृतभाषायामेव जागर्ति। शक्तिरियं गरुत्मतः समाना। तथा च यथा सुपर्णो महापराक्रमस्तथा शक्तिरियमपि महासत्वेति भावः। व्यवहारे परं गरुडोपरि परमात्मा स्यात्।

तेन त्वध्यात्मयोगे शेषाशायिनैव भाव्यम्। तदा यदि संस्काररूपः शेष उपरिभवेत्तं तार्क्ष्यो गिलेत्। तस्माद्योगतत्त्वमेव शेषशायितत्त्वम्। इदमनन्तमव्ययं च। कतिपयसमये गरुडगर्वभङ्गोऽप्यस्तीति ब्रूमः। स चाहङ्कारखण्डनमभिमानत्यागो वेत्याशयः। सन्दिग्धावस्थानावसरे सत्यं को वा जागरूकोऽस्ति। शेष एव नान्यः। अत्रोदाहरणम्। वने श्रीरामसीतयोः स्वापसमये लक्ष्मण एव प्रबुद्धोऽभूत्। स तु शेषरूपः। अतः स निर्निद्रः। एवमेव बलरामोऽपि। सोऽपि शेषात्मा।

पूर्वं जनमेजयः पन्नगवंशविनाशवर्जमियाज सर्पयागम्। अयमस्य भावः। यथा न विनश्येन्मूलभूतया धार्मिकसंस्कृत्या करम्भिता संस्कृतकला तथा तादृशसंस्काररूपमादिशेषमावीदास्तिकाग्रेसरः स महाभागः। तथैवास्तिक्यमेकमेव रक्षति संस्कृतभाषारूपमस्मांश्च। किन्तु सर्पेण क्रीडनं कष्टतरम्। सावधानमवस्थेयम्। औषधविषयेऽप्यावश्यकी जागर्या।

प्राक्तना आगमाः कूलङ्कषं विचिन्तनीया विचारणीयाः सत्पथ उपयोक्तव्याश्च। न तु पठनमात्रपर्यवसायिनः कार्यास्त्याज्याश्च।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किञ्चैते मूढभक्तिपुरस्सरं क्वापि कोणे तिरोधाय कस्याप्यप्रकाश्या न कर्तव्याः। (Mere Superstitious nature is of no use) न किमपि प्रयोजनमन्धपरम्परागतैः कैश्चिदाचरणैः। अविवेचनैर्न नाश्याः सर्वेऽपि धर्माः। श्रद्धाभक्तिविधुराणां न वक्तव्या धार्मिकपद्धतिरिति गुरूणामनुशासनात्तत्कथनं रहस्यं संवृत्तम्। बलरामलक्ष्मणौ शेषरूपाविति पूर्वमभ्यधायि। सदा तौ जागरूकौ सन्तावविच्छेदं धर्मं गोपायतः। तदेव तयोः परमं कर्तव्यं कर्म।

शेषरूपो भगवान्पतञ्जलिरपि यथाक्रमं शब्दयोगानुशासनाभ्यां वाङ्मनोमले विलुम्पन्प्रदर्शयामासात्मज्ञानस्य पन्थानम्। अभङ्गुरं धर्मसंस्थापनाय खलु महात्मनामवताराः।

प्रधानं खलु वपुषो दार्ढ्यम्। इदं शब्दानामप्यन्वेति। शब्दपरिशुद्धिरेव शब्दानुशासनमिति भण्यते। अनया दृष्ट्या सांस्कृतं व्याकरणशास्त्रं मुख्यं सञ्जातम्। अस्माकमिदानीमपेक्षितमगाधं ज्ञानम्। (Deep study) तत्र विशालो व्यासङ्गोऽपि मुख्य एव। (Wide study) अगाधज्ञानार्जननिरपेक्षा निष्फला विशाला व्यासङ्गाः परं नापेक्षिताः। (Superficial study) मुख्यतमं खलु तत्त्वान्वेषणम्। तत्सर्वेषामसाधारणं धनम्। न तु कतिपयव्यक्तिमात्रविश्रान्तम्। (Monopoly) सुखजीवनोपयोगि प्रभूतं वाङ्मयम्। तत्त्वज्ञानस्य तूपयुक्ते धर्मस्वरूपबोधसदाचरणे। श्रीरवीन्द्रनाथठाकूरमहोदयेन साधनाभिधे स्वग्रन्थे निर्दिष्टयोर्द्वयोर्यतिनोर्वृत्तान्तोऽत्रोदाह्रियते।

कश्चन कविर्मध्येपथं द्वौ यतिनावभिपेदे। तयोरेको ज्ञानी। कविना संभाषितः स ज्ञानी वाचंयमः स्मयमानः पुरतोऽध्वनि निर्जगाम। तदनु कविरन्यं यतिमाबभाषे। अथ यतिरेवमुत्तरयामास। आयुष्मन्वर्तस्व प्रतनसम्प्रदायमनुल्लङ्घमानः। नेदं विरुद्धं नव्यसम्प्रदायस्य। मार्गोऽऽन्यः। तत्त्वं परमेकमेवेति। भूयोऽपि कविस्तमप्राक्षीत्। आर्य किमर्थमिमं विषयं भुवि न प्रसारयसीति। अथैवं यतिर्व्याजहार प्रत्युत्तरं तस्य। भद्र पिपासुः स्वयमेवायाति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जलपानाय। यस्मै कस्मै चन तृषिताय सलिलं प्रदेयमेव। तन्नास्तीति न वक्तव्यम्। तथैव परीक्षितायार्हतमाय श्रद्धालवे तत्त्वजिज्ञासवे तत्त्वमवश्यं कथनीयम्। तत्त्वबुभुत्सुर्यः को वा भवतु। यत्र कुत्र वा काले देशे वा समभ्यस्यतु न कापि हानिः। अन्ततस्तत्त्वमेकमेवेति।

प्रकृतेऽत्र संदर्भे केचन व्यावहारिकं पारमार्थिकं चेति ज्ञानं द्वेधा विभजन्ति। साधनीयमिदं निर्दिष्टज्ञानद्वयविदा। न संपूर्णं फलं तयोरन्यतरेण ज्ञानेन। आत्मज्ञानानुपलभ्यं यावद्देहलौकिकं व्यावहारिकं ज्ञानमस्त्येव। तादृशज्ञानसंभवादूर्ध्वं पारमार्थिके सच्चिदानन्दानुभवेऽवस्थानं भवेत्। व्यावहारिकज्ञानात्पारमार्थिकं ज्ञानमेकमेवाभ्यर्हितम्। तदुक्तं श्रीभगवद्गीतायाम्—

"इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः"॥ इति।

महाभारते द्रौपद्याः पञ्चपतित्वं वयं शृणुमः। एतत्तत्त्वविचारः कार्यः। पञ्च चेन्द्रियाणि। तेषां द्वारेणैव ज्ञानमुत्पद्यते। इदमेव तस्य तत्त्वम्। तदवबोधः शब्दानुशासनाभ्यां जायते। योगो नाम चित्तवृत्तिनिरोधः। सुखदुःखादिष्वनुद्विग्नमनस्त्वं समबुद्धिः। इयमपेक्षिता सर्वेषाम्। इदमन्तरा बुद्धितत्त्वातिगं किमपि सोपानमनारोहणीयमेव। बुध्या प्रचोदितं विभास्वरं किमपि वस्त्वन्यदेव। तत्तु बुद्धेरतिरिक्तम्। विदितमपि तत्त्वमपरोक्षानुभवपर्यवसायि सम्पादनीयम्। एककेन्द्राद्विनिर्गतानि वृत्तानीव (Concentric circles) प्रतिविषयं श्रवणयोगात्मतत्त्वानि त्रीण्यपि संवलितानि। अनादिनिधनाविच्छिन्नसम्प्रदायागतेन संस्काररूपेण निधिप्रतिमेन भृशं संवर्धितेन सर्वत्र प्रचारितेन संस्कृतज्ञानेन तत्त्वान्वेषणं तदनुसन्धानोत्थानन्तानन्दानुभवश्च संपाद्यौ। इदं पावनतममानन्दप्रापकं च ज्ञानज्योतिः न बहिर्गतः प्रमोदः। अस्मास्वेव स निलीनः। स च साक्षात्करणीयः। इदमेव विद्याभ्यासस्य परमं लक्ष्यम्। कलाभ्यासस्य समीचीनः संनिवेश आश्रयश्चावश्यकौ। यः कोऽपि वा ऋजुतमो मार्गो यदि लक्ष्यमेकमव्यभिचरितं स्यात्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संस्कृतभाषेयं नैस्त्रैगुण्यापादिका बहुतत्त्वगर्भिता महाप्रमोदसाधिका;च। अस्यां च बहुत्र सिद्धसाधुपदे एव प्रयुक्ते दृश्यते। ईदृशपदप्रयोगाभ्यामेवागमाध्ययनात्तत्त्वसिद्धिः स्यादित्यर्थोऽभिव्यज्यते। नान्यथा। ईदृक्षपदप्रयोगावन्यभाषासु नैवोपलभ्येते। इयमसाधारण्यभ्यर्हिततमा देवभाषा सर्वैर्निर्निरोधं नितरां रक्षणीया पठनपाठनादिभिः। अनेन नूनमात्मनः प्रपञ्चस्य च समुद्धरणं जायते। एकेनैव पण्डितेन साध्यते मूढसहस्रेण भवितव्यं कर्म। मूर्खसहस्रैरभ्युपगतोंऽशो बहुसंमत इति न स्वीकार्यः नापि कार्यमुखेन प्रवर्तनीयश्च। मितसंख्यातैरपि दशभिर्विबुधैरभिप्रेतो विषय एव साधुः।

अस्मासु वाणीलक्ष्म्योरसौहृदमेवेति ब्रूमहे। यस्मिन्भारत्याः प्रसादस्तस्मिन्पद्मालया नानुग्रहः। यस्मिल्लक्ष्म्याः प्रीतिस्तस्मिन्सरस्वत्या नादर इति। अयमर्थो वेदेऽपि दिङ्मात्रमुपदर्शितः। अथवा यदि भगवती वाग्देवी सुप्रसन्ना तदा तदुपनतया ज्ञानशक्त्या कमलापि सप्रसादा कर्तुं शक्या। तदास्तां तावत्। ऐहिकमिदं नश्वरं वित्तमग्रे सुखोत्पादनापदेशेन परिणामे दुःखातङ्कोदर्कमेव स्यात्। अतो विपश्चिद्भिरपेक्षणीयः संपादनीयश्च निरवधिः पारमार्थिकः स्थास्नुरानन्दमयोऽपवर्गरूपो दिव्यनिधिः।

आर्याः सभासदः—साम्प्रतं वैशेषिक [वार्षिक] परीक्षासूत्तीर्णानामन्तेवासिनां बहुमानधनविनियोगावसरौपयिकानां केषांचन सुभाषितानां मद्भाग्यादतर्कितोपनतोऽयं भाषणावकाश इति भृशं सन्तुष्यामि।

भगवती श्रीगायत्रीदेवी विश्वेषां मतिप्रचोदनं कुर्वती पायादित्याशास्यते।

"धियो यो नः प्रचोदयात्"। "समेधतां भावुकपारम्परी"।

एवं संस्कृतभाषानुवादकः—

करूरु शेषाचार्यः

ज्यौतिषरत्नं, संस्थानधर्माधिकारी,

विश्रान्तज्योतिश्शास्त्रप्रधानोपाध्यायः.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आख्याऽनेकस्य वर्णोर्ध्वः स्वरःस्यात्कारतोत्तरः ॥ १६ ॥

वर्णशब्द ऊर्ध्वो यस्मादसौ वर्णोर्ध्वः यः स्वरः सः अनेकस्य ह्रस्वदीर्घप्लुतरूपस्य स्वरस्य आख्या भवति द्वयोस्त्रयाणां वा । संज्ञायाः प्रयोजनं "तद्वर्णव्यवेतकः" "इवर्ण उत्तरः" इत्यादि । कारशब्दोत्तरः तकारोत्तरो वा स्वरः तस्य स्वरस्य आख्या भवति । संज्ञायाः प्रयोजनं "एदोत्पूर्वेऽप्यकारोर्ध्वे" एत्वमेदैत्" इत्यादि । अनत्यच्ययवावेदोदायावावैत्तु औत्पर" इत्यादौ तकारः कुत्रचित् सुखोच्चारणार्थमपीति विज्ञेयम् ॥

[1] भवेदकारकारोर्ध्वो [2] हलामत्तु र एफगः ॥ १७ ॥

अकारः कारशब्दश्च तौ ऊर्ध्वौ यस्मात् स वर्णः हलां आख्या भवति । अकारव्यवहितः कारशब्दोत्तरो वर्णः व्यञ्जनानां आख्या स्यादित्यर्थः । संज्ञायाः प्रयोजनं "मकारः पदमीस्पूर्व" इति । र इति वर्णः एफगो भवति । एफं गच्छतीत्येफगः, रस्य तु एफशब्द आख्या स्यादित्यर्थः । यथा "रेफोर्ध्वो लुप्यते रेफ" इति [3]रस्य व्यञ्जनत्वाविशेषात् प्राप्तमकारसहितकारोत्तरत्वं

वृषण्वानिति वृषण्+वान्, एमन्, जनान्, राजन्यम्, देवानाम् इति । चवर्गान्त्यवर्णस्य अवसाने असंभवात् चतुर्णामेव ग्रहणम् । अध्यर्धमात्रविरामस्यैव अवसानत्वात्, अवसानस्थानामेव वर्गान्त्यवर्णानां नादसंज्ञाविधानात् तादृशाध्यर्धमात्राविरामस्य न्यूनत्वे नादसंज्ञाप्रयुक्तकार्यन्न भवति । वाक्यान्ते वा पदकाले वा पदान्ते वा अवग्रहान्ते वा तादृशविरामस्य सद्भावात् तत्रत्यानामेवान्त्यवर्णानां नादसंज्ञाप्रयुक्तकार्यं भवतीति फलितोऽर्थः । जनान् यातयति, तस्मिन् ह्यात्मानं, इत्यादौ तु नादकार्यं "विरामे व्यञ्जनस्यैवे"त्यस्य व्याख्याने स्फुटीकरिष्यते, इति सर्वं . . . ॥

[1] भवेदकारः कारोर्ध्वे इति पाठान्तरम् । [2] हलां रस्त्वेफगो भवेत् इति पाठान्तरम् । [3] "रस्य व्यञ्जनत्वाविशेषात् प्राप्तयोरकारयकारोत्तरत्वकेवलाकारोत्तरत्वयोरुभयोरपवादादेवनिवृत्तौ भाविप्रयोगानुसारात् तुशब्देन अन्यतराकारकारोत्तरत्वमात्रं निवार्यत इति सर्वं . . . ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तुशब्दो निवारयति। अपि च सर्वव्यञ्जनानां अत् अकारः आख्या स्यात्। यथा "समहृदयपितृपूर्व" इति। किं च अनेकवर्गग्रहणे अनन्त्यस्य प्रथमस्य अकार एव आख्येत्युच्यते। कुतः? वचनगौरवं मा भूदिति। अनेन तादृशः प्रथमः अकारपरस्सन्नपि तत्तद्वर्गस्यैव ग्राहकः स्यादित्यर्थः। यथा "तवर्गश्च टवर्गाद्यावि"ति। अपरे तु संगिरन्ते—"अकारस्सर्वस्स्वरान्तस्य ग्राहकः। तेन "आ नो दिवोऽश्नाविष्णू" पावक वन्धोऽग्ने इत्यादि "ग्रजोर्ध्वोऽकार उच्चक" इत्येकादेशस्य उदाहरणं स्यादिति। तदसाधु। कुतः? "टान्तो वाघोषपूर्व" इति षपूर्वत्वात्तकारस्य टत्वे कृते इषे ट्वेति स्यात्। तच्चानिष्टम्। किञ्च, "यवनहेष्वजूर्ध्वेष्वि" त्यत्र अजूर्ध्वशब्दो व्यर्थः स्यात्। भवन्मते सर्वस्वरान्तस्य व्यञ्जनस्य स्वीकारनियमात्। तस्मादनुपपन्नमेतन्मतं मन्महे। किन्तु वर्णमात्रस्य आख्या। एवं स्वरव्यञ्जनानामाख्याविकल्पो विज्ञेयः। वाच्यानां तत्तत्स्वरूपोच्चारणानां कारोत्तरत्वादिविधिः कथितः, मुख्यत्वात्। [1] रङ्गादीनान्तु कारोत्तरत्वेन [2] उच्चारणासंभवाद्वाचकमेवाभिधानं स्यादिति केचित्। एषां वर्णगौणत्वात् कारोत्तरत्वं न सम्भवतीत्यन्ये। वर्णगौणत्वमिति कथं प्रतीयते? क्वचिदप्येषां पदादौ [3] वर्तमानत्वाभावादिति॥

अदन्तं ग्रहणं वा स्यात्सन्देहे [4] सन्निधिं त्वपि॥ १८॥

निमित्तं प्रधानं, कार्यभाक् लक्ष्यमिति, लक्ष्यं निमित्तञ्च ग्रहणमित्युच्यते गृह्यत इति ग्रहणं लक्ष्यं। गृह्यते अनेनेति

---

1 "रङ्गादीनान्तु केवलकारोत्तरत्वेन अकारकारोत्तरत्वेन अकारोत्तरत्वेन चोच्चारणासम्भवादि'ति सर्व। 2 उच्चारणारुचिरत्वादिति क्वचित्पुस्तके। 3 "वर्तमानत्वाभावात्। अत एव" स्वरायुक्तस्य वर्णस्य वाचकन्नाम कथ्यते इति संगच्छते, इति सर्व..। 4 सन्निधि तयोरिति पाठान्तरम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निमित्तमपि ग्रहणम्। ग्रहणं प्रातिपदिकं पदैकदेशं सर्वावस्थं अदन्तं अकारान्तं स्यात्। "साहस्रसारथि" रित्यत्र साहस्र-ग्रहणमकारान्तगृहीतं लक्ष्यमुदाहरणम्। यथा, द्विषाहस्रं चिन्वीत, त्रिषाहस्रो वै। निमित्तन्तु "ओष्ठेतनेव एष्ठश्चेदि" ति। यथा, अधरेणोष्ठेन, स्वाहोष्ठाभ्याम्। तयोर्लक्ष्यनिमित्तयोर्ग्रहणं वा स्यात्। यथा "सकृसनिश्च सनीस्सनि" कृष्णो वीड्ढार्यदा चराव्" इति। सन्देह इति। ग्रहणे सति [1]तद्रूपसामान्यस्य अन्यत्र कार्यभावे यदि सन्दिग्धं स्यात् तर्हि कार्यभाजो वा निमित्तस्य वा यदासन्नं तद्वर्णं पदं वा गृह्णीयात्। अनेकं वा स्यादित्यूहनीयम् [2]तस्मादनेन विनाऽपि तत्र तु एकेन मुख्यनिमित्तेनैव कार्यं स्यादित्युत्तरत्र वक्ष्यते। सविशेषणकार्यभाग्यथा, आपृषती आहुती। अनेकसहितं यथा, चोत्तमे उभे। सविशेषणनिमित्तं यथा "रषऽपूर्वः" पदि मह्यो हि मो" यवि इत्यादि॥

निर्देशाः कारमुख्याश्चान्वादेशावपि चेत्यधः॥ १९॥

कारशब्दादयो वर्णनिर्देशवाचकाः स्युः। यथा "ऊकारः स्थित" इत्यादि। अपि, च, इत्येतौ शब्दौ अधः पूर्वतः स्थितस्य अपेक्ष्यस्य अन्वादेशकौ स्तः। यथा 'सुपूर्वश्शोऽपि चन्द्रोर्ध्वः' "मश्चावग्रह इत्येकम्" इत्यादि। क्वचित्पादपूरणार्थमपि गृह्यते। कुतः? सर्वासां शिक्षाणां वचनरूपत्वादिति॥

त्वथैवेति [3]निवृत्तिस्थो ह्यधिकारोऽवधारकः॥ २०॥

तु, अथ, एव, इत्येते शब्दाः क्रमेण निवर्तकाधिकारकावधारकाः स्युः। यत्र तुशब्दः श्रूयते तत्र निवृत्तिः, यत्र अथशब्दः तत्र सूत्राधिकारः यत्र एवकारः, तत्र अवधारणं चेति मन्तव्यम्।

---

1 "तद्रूपसाम्यादन्यत्र कार्यभाक् निमित्तं वा पदं यदि संदिग्धं स्यात्तदा कार्यभाजः" इति सर्व . .। 2 "तस्मादेकेन गौणनिमित्तेन विनापि एकेन मुख्यनिमित्तेने" सर्व . .। 3 निवृत्तिस्थोऽधिकारश्चावधारकः इति पाठान्तरम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथा "हलां रस्त्वेफगः" अथ प्रग्रह एवान्तः" "विलोमेऽप्येव तौ ज्ञेयौ" इत्यादि। निवृत्तौ तिष्ठतीति निवृत्तिस्थः, अधिकरोतीत्यधिकारकः अवधारयतीत्यवधारकः॥

[1] अनमान निषेधे स्युर्वेति वैभाषिको भवेत्॥ २१॥

अन्, अ, मा, न, इत्येते शब्दाः प्रतिषेधका भवेयुः। यथा "त्वे इत्यनिङ्गधगम्" "लोपस्स्यादप्रदर्शनम्" मा भूत्, नोपसर्गोऽवसानस्थः" नो चेत्। वेतीति वा इति शब्दः वैभाषिकः वैकल्पिकस्स्यात्। यथा "अदन्तं ग्रहणं वा स्यादिति॥

संमिश्रस्स्याद्यदेकत्वं संबन्धः श्रवणे द्वयोः॥ २२॥

द्वयोः अचोः यदेकत्वं एकीभावः एकश्रुतिः सः संमिश्रसंज्ञः स्यात्। संज्ञैषा केवलस्वरयोः स्वरधर्मयोश्च। यथा सं ब्रह्मणा पृच्यस्वैकताय, सैवास्मिन्, अपां त्वेमन्, सोऽपः। संबन्ध इति। द्वयोः श्रवणे सति एकीभावः संबन्धसंज्ञः स्यात्। संज्ञेयं व्यञ्जनस्वरयोः। यथा तदाहुः॥

अनेकव्यञ्जनश्लिष्टः संयोगश्च प्रकीर्तितः॥ २३॥

एकं न भवतीत्यनेकं, अनेकं च तत् व्यञ्जनं च अनेकव्यञ्जनं व्यञ्जनद्वयादीत्यर्थः। तस्य श्लिष्टः नैरन्तर्येण अविरामेण संयोगो य एकीभावः सः संयोगसंज्ञः स्यात्। संज्ञैषा व्यञ्जनयोः व्यञ्जनानां च। यथा द्वाभ्याँ स्वाहा, एतान्ध्सोमान्। संयुक्तसंयुतादिशब्दः समित्युपसर्गाभावेऽपि संयोगार्थक, इति चशब्दो ज्ञापयति। यथा "संयोगादिर्द्धिरुच्यते, 'तदा गकारसंयुक्तः' 'संयुतोष्मोर्ध्वः' 'युक्तोर्ध्वं व्यञ्जनान्तं च' इत्यादि। एवं त्रिविधवर्णद्वयसंपर्कस्य भेदो विज्ञेयः॥

---

[1] अनमाना निषेधाः स्युरिति पाठान्तरम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वर्णाभावो विरामश्चावसानं सार्धमात्रिकः ॥ २४ ॥

वर्णानामभावः शून्यः तूर्ष्णीभूतः कालः विरामसंज्ञः स्यात् । अणुकालविरामो यथा, आत्मानं या आविविशुः । द्व्यणुर्यथा, स आत्मा । त्र्यणुर्यथा, प्रउगम्, मात्राकालो यथा, स उवेकवि॑ँ शावर्तनिः । सपादमात्रो यथा, मो एषाम् । अवसानमिति, अर्धेन सहितो मात्राकालः सार्धमात्रः । अध्यर्धमात्रो विरामः अवसान-संज्ञः स्यात् । उत्तरपदेन परस्पर[1]सन्धिराहित्यस्य अध्ययन-स्यान्ते विरामोऽवसानमिति यावत् । यथा पाकयज्ञमिति पाक—यज्ञम् (२) वै (२) अन्विति (२) आहिताग्नेरित्याहित—अग्नेः (२) । प्रप्रेति प्र-प्र । अत एव प्र बुध्निया ईरते, तस्मिन्न ह्यात्मानम्, एतान् होमान् इत्यादावसानसंज्ञा न स्यात् । ननु पदविरामस्य द्विमात्रत्वादवसानसंज्ञा कथं सिध्येत् ? उच्यते । शते पञ्चाश-न्न्यायेनेति । द्विमात्रे सार्धमात्रत्वं सुतरामस्ति तेन कार्यं भवति । अधिकं तु न निषिध्यते । एवमादि विज्ञेयम् । सार्धमात्रविरामस्य न्यूनत्वाभावात् विश्रमसमये पदावसानविधिर्भवतीत्युक्तम् । अत्र कति (कियान्) काल इति चेत् ऋग्विरामकाल इति के चित् । यथाशक्तिकाल इत्यन्ये । तच्चिन्त्यम् ॥

[2]नानापदवदिङ्ग्यं चासंख्याने चाद्यवग्रहः ॥ २५ ॥

असंख्याने विषये इङ्ग्यं नानापदवत् भिन्नपदमिव भवति । नानापदवदिति किम् ? ओषतात्तिग्महेते, तत्प्रवाते विषजन्ती-त्यादौ 'आदेत्पूर्वस्ते थे तु बह्वच, इति प्रग्रहत्वं मा भूत् ।

---

[1] सन्धिराहित्येनोच्चरितस्य अध्ययनस्येति क्वचित्पुस्तके । सन्धिराहित्यस्य असंहिताध्ययनस्येति च क्वचित्पुस्तके । [2] नानापदवद्भावविधानाभावे तु तिग्महेते, प्रवाते, इत्यनयोरिङ्ग्यत्वेऽप्येकपदत्वात, यथाक्रमं एकाराकार-पूर्वत्वाच्च उभयत्रापि ते इत्यस्य 'आदेत्पूर्वस्ते थे तु बह्वच इति प्रग्रहत्वं स्यादिति भावः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1] किंच षडहः, पुर एता, इत्यादौ पूर्वान्त्यवर्णस्य उत्तरभागादिवर्णेन पदसंहिताविधिश्च भवत्विति [2] तस्मात् पदानां पदसंख्यान-निमित्तत्वशंकालेशोऽपि नास्ति। असंख्यान इति किम्? 'द्वे पर-श्चैकव्यवेत इत्यनेन' तस्माद्धि सवने शुक्रवतीत्यत्र प्रग्रहत्वं भवतीति वदामः। आद्यवग्रह इति। अस्य इङ्गयस्य आदिपदं पूर्वांशः अवग्रहसंज्ञं स्यात्। संज्ञायाः प्रयोजनम् "अवग्रहो न चेदिति" यथा अग्नीवरुणौ॥

वेदभागः (पाठः) क्रमेणैव स चार्षः कथ्यते बुधैः॥ २६॥

क्रमेण आनुपूर्व्येण यः वेदपाठः संहितारूपोऽध्यायः अवसान-रहितश्च उच्यते स एव आर्षसंज्ञः स्यात्। स्वपाठः, स्वयंपाठः, यथापाठः, प्रकृतिपाठः, इत्येतेषामपि आर्षसंज्ञेति चकारो बोधयति। यथा 'अथादावन्त आर्षे तु। अभिनन्तस्स्वपाठेऽचि' इत्यादि। ननु क्रमेणैव पदेषूक्तेषु आर्षसंज्ञा किं न स्यात्? उच्यते। [3] विभागसमये आर्षपदानां परस्परसन्धिराहित्यादिति। अन्ये तु अन्यथा कथयन्ति। पदानामृषिप्रोक्तत्वाभावादिति। तदसाधु। तथा सति "आर्ष" इत्यृषिप्रोक्त इत्यर्थः स्यात्। ततश्च पदपाठरहिताध्यायोऽपि ऋषिप्रोक्तस्स्यात्॥

---

[1] इङ्गयपदानां नानापदवद्भावविधाने इष्टरूपसिद्धिं च दर्शयति किं चेति। 'तृतीयं घोषवत्परः। अन्तोऽच्परस्सवर्गीयमिति षडह इत्यत्र षट् इत्यस्य पदत्वादच्परत्वाच्च टकारस्य डकाररूपतृतीयादेशः, "अवर्णाद्यत्वमच्पर" इति पुर एतेत्यत्र पुर इत्यत्र विसर्गस्य यत्वं च सिध्यति। तस्य च यकारस्य "यकारो ऽवर्णपूर्वोऽचि ह्यादेशो यदि लुप्यत" इति लोपो भवति। "एत्वमेदैत्परे तथेत्यैत्वन्तु। "न प्लुते प्रग्रहे सन्धिविधिर्यत्वे तु लुप्तक" इत्यनेन निषिध्यत इति पुर एतेति सिध्यति। एवं च इङ्गयपदानां नानापदवद्भावविधानाभावे तु तृतीयत्व यत्वादिपदसंहितोक्तविधयः दुर्लभा इति भावः। [2] तस्मात् पदानां पदसंख्यातिरिक्तत्वशंकालेशोऽपि नास्तीति क्वचित् पुस्तके। तस्मात् बहुस्वरत्वशंकालेशोऽपि नास्तीति सर्वं। [3] विभागसमये अनेक-पदसंहितेति क्वचित्पुस्तके॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उच्छ्वासेऽनवसाना स्यात् संहिता चान्तगं पदम् ॥ २७॥

न विद्यते अवसानं यस्याः सा अनवसाना । एकैकस्मिन्नुच्छ्वासे मुखेन तन्मध्ये अवसानराहित्यं यथा भवति तथा यावानुच्चार्यते वेदभागः स संहितासंज्ञः स्यात् । विश्रमे पदावसानाविधिरिति पूर्वमेवोक्तम् । अन्तगमिति अन्तं अवसानं गच्छतीत्यन्तगम् । अवसानसहितो वेदभागः पदसंज्ञः स्यात् । यथा इषे, त्वा, ऊर्जे, त्वा, इत्यादि ॥

पदवर्णस्वराङ्गानां [1] द्विर्द्विर्युक्ते च संहिता ॥ २८ ॥

पदे च वर्णौ च स्वरौ च अङ्गे च पदवर्णस्वराङ्गानि । तेषां प्रत्येकं द्विर्द्विस्संपर्के सति तत्तत्संहितेत्यभिधीयते । द्वयोर्द्वयोः पदयोः तत्तत्सन्धिविधिना रचिता या संहिता सा पदसंहितेत्यर्थः । [2]" अथ स्वरावुभौ " इति पर्यन्तं पदसंहिता । सा यथा, गावो वै इत्यारभ्य—गृह्णन्ति, (पर्यन्ता) युञ्जानः प्रथममित्यारभ्य धियः पर्यन्ता । केवलयोः अचोस्संमिश्रे सति स्वरसंहिता अक्षरसंहितेति । " अथ स्वरा " वित्यारभ्य " ग्रन्थान्तरे " पर्यन्ता । सा यथा अपात्मानम्, इन्द्रोऽवृणीत । अत्र स्वरशब्दप्रयोगात् उदात्तादिस्वर-

---

[1] युक्ते तु संहिता इति सर्वं पाठः । [2] इयं वर्णानां कारणमित्यादिस्वरलक्षणपर्यन्ता विज्ञेया । यथा गावो वै, नि नो रयिम् । केवलव्यञ्जनयोः व्यञ्जनानां वा योगे द्वित्वं वर्णसंहिता । सा तु " स्वरपूर्वमियाद्धित्वं व्यञ्जनं व्यञ्जनोत्तर " इति । द्वित्वादिबोधकवचनानां लक्ष्ये विज्ञेया । यथा इषे त्वोर्जे त्वा कल्पाञ्जुहोति, विख्येषम्, मेध्य विद्युतः । स्वरसंहिता द्विविधेति केचित् । केवलयोरचोस्सम्मिश्रे अक्षरसंहिता, उदात्तादिस्वरधर्मयोः संयोगे स्वरसंहितेति । यथा सैवास्मिन्, सोऽपः, याज्यैवैनम्, अग्ने दुध्र गह्य किंशिल वन्य या ते । नन्वत्र वर्णसंहिता किं नस्यात्? इति चेत् उच्यते । सर्वेषामचां हलां च वर्णसंज्ञा अस्त्येव । तथाप्यत्र औचित्यात् हलामित्युक्तम् । " स्वराणां पूर्वतश्चैव " इत्यङ्गसंहिता । यथा अग्नयः स्वाहा इति सर्वं ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धर्मयोः संयुक्तेऽपि स्वरसंहितेति चकारार्थः। "वर्णानां कारण"मित्यादि ह्रस्वस्वरलक्षणपर्यन्ता स्वरधर्मसंहिता। यथा याज्यैवैनम्। नि नो रयिम्। केवलव्यञ्जनयोः योगे वर्णसंहिता। "स्वराणां पूर्वत" इत्यादि सर्वत्र अङ्गसंहिता च। ननु दुध्र गह्य किँ शिलेत्यादौ वर्णसंहिता किं न स्यात्? उच्यते। सर्वेषामचां हलां च वर्णसंज्ञा अस्त्येव। तथाप्यत्र औचित्यात् हलामित्युक्तम्। यथा ऋच्यध्यक्षराणि यत्, यद्भ्वाभ्यां द्वे प्रीणीयात् इत्यादौ संहिताचतुष्टयं विज्ञेयम्। ननु अग्न दुध्र गह्येत्यादौ स्वरधर्मेणापि संहितासंज्ञा अस्तीत्युक्त "उच्छ्वासेऽनवसानेति [1] पूर्ववचनमनारब्धव्यम्। आरभ्यमाणे पुनरुक्ततया गौरवं भवेत् [2]। मैवं मंस्थाः। आरब्धव्यमेवैतत् अग्न दुध्र गह्येत्यादौ अनेन संहितासंज्ञा भवतु। इममेव तेन लोकमित्यादौ संहितायां स्वरधर्मासम्भवात् कथं सिध्येत्? तादृशसाधनाभावात्। [3];तस्मात् तदर्थं वा तद्वचनं सार्थकमिति सन्तोष्टव्यम्। तदर्थं वेति गुडजिह्विकान्यायः। तथा हि—स्वरधर्मेणेति गमनिकामात्रम्। कण्ठोक्तिस्तु विशेषः। ततस्स्वरधर्मेणेति स्यादित्येतदर्थमपि वचनमिति भावः। किं च यत्र यत्र संहितेत्यविशेषेण वक्ष्यति तत्र का संहितेति तन्मा भूत्, पदसंहिताया एव प्रत्ययार्थमिति॥

[4] द्विधादिसंहिता ह्यत्र पञ्चैवं [5] संहिताः स्मृताः॥ २९॥

ताश्चतस्रस्संहिता उक्ताः। तासामादिसंहिता पदसंहिता द्विविधेति जटारूपसंहिता द्वितीयेति विज्ञेया। यथा इषे त्वा

---

[1] पूर्ववचनमनर्थकमिति चेत्? सत्यमिति क्वचित्पुस्तके। [2] पदसन्ध्यभावस्थले स्वरधर्मे प्रवृत्ते अनेन भवतु। इममेव तेनेत्यादौ इति सर्वे। पदसन्ध्यभावस्थलेऽपि संहितासंज्ञा भवति। यथा दुध्र गह्यकिँशिल वन्य मही गृणाना, इत्यादि इति क्वचित्पुस्तके। [3] तस्मादित्यारभ्य वचनमिति भाव इति पर्यन्तं क्वचित्पुस्तके न दृश्यते। [4] "द्विविधा संहिताद्यात्रेति" सर्वे पा.। [5] "षडेवं संहिता" इति पाठं स्वीकृत्य तदनुगुणेन (तदानुगुण्येन) क्वचित्पुस्तके व्याख्यातम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्येव इषेत्था। अनेन प्रकारेण पञ्च संहिताः उक्ताः। स्वरस्य द्वैविध्यपक्षे तु षट् संहिताः विज्ञेयाः॥

पदवत्संहिता यत्र न कार्यं सांहितं यदि।
[1] विज्ञेया प्रकृतिस्तस्या ज्ञानादेव फलं लभेत्॥ ३०॥

[2] या संहिता पदवत् पदाध्ययनकाल इव सांहितं संहिता, प्रयुक्तं च कार्यं यत्र नास्ति सा प्रकृतिसंहितेति विज्ञेया। तस्याः ज्ञानादेव फलं लभेत। न तु संज्ञाप्रयुक्तकार्यमित्यर्थः। यथा अभिनन्त एवैः, स्वधा असि, सुश्लोकाँ (४) इति-सु-श्लोकाँ (४), न मिथुनी अभवन्, त्री (३) इत्यब्रवीत्, ऋतू अग्नेरन्तश्श्लेषोऽसि, ते अन्न अश्वम्, अथो ओषधीषु॥

संहितावत्क्रमो ज्ञेयो द्वितीयं पदवद्द्वयोः।
इति गन्त्वादि चेदुक्त्वा द्वितीयं चोत्तरं तथा॥ ३१॥

यत्र द्वयोः पदयोः संहितेव (संहितायाः) इव उच्चारणं क्रियते-द्वितीयं पदं पदवत् पदावसाने यथा भवति तथा उच्चार्यते सोऽध्यायः क्रमसंज्ञः स्यात्। यथा गावो वै वा एतत्। तयोर्द्वयोः आदि आदौ वर्तमानं पदं इतिगमिति इतिशब्दभाक् चेत्—इङ्गयं प्रगृह्यं चेदित्यर्थः। तदितिशब्दसाहितमुक्त्वा द्वितीयं पदं तदुत्तरं पदं चेति द्वे पदे पूर्ववदुच्येते। एवं सर्वत्र आनुपूर्व्यात् पूर्वोत्तरभाग-द्वयोर्द्वयोः पदयोः क्रम इति चशब्दार्थः। अनेन प्रतिक्रमा (ममन्तेऽपि पदविरामः क्रियत इत्युक्तम्। यथा पाकयज्ञं वै। पाकयज्ञमिति पाक-यज्ञम् वा अनु। ते एनम्, ते इति ते—एनमभि अभि

---

[1] ज्ञेया सा प्रकृतिरिति पाठ। [2] संहिता यत्र पदवत् पदाध्ययनकाल इव दृश्यते तत्र पदसंहिताप्रयुक्त सन्धिकार्ययोग्यत्वेऽपि सांहितं सन्धिकार्यं यदि न क्रियते सा प्रकृतिः प्रकृतिसंहितेति विज्ञेया। तस्याज्ञानादियं प्रकृति-संहितेति विशेषावगमनमात्रादेव फलं "लक्षणज्ञस्तदाप्नोति ब्रह्मज्ञानं हि शाश्वत" मित्युत्तरत्र वक्ष्यमाणब्रह्मप्राप्तिरूपफलं लभेत इति सर्व॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम् ।...[1] तथा द्वितीयपदस्यान्ते एकपदं तुशब्दो निवर्तयति । यथा स प्रत्नवत् प्रत्नवान्नि प्रत्नवदिति प्रत्नवत् । नि काव्या । यद्वेव द्वे इव द्वे इति द्वे इत्यादि विज्ञेयम् ॥

आदन्तन्तु यदुच्चान्तमोपसर्गपरं यदि ।
परेण त्रिक्रमः स्याद्धि षुपदं नःपरं त्वधः ॥ ३२ ॥

उच्चः अन्ते यस्य तदुच्चान्तं उदात्तान्तं आदन्तं आकारान्तं पदं आ इत्युपसर्गपरश्चेत् परेण पदेन सहेत्येतत्पदत्रयस्य क्रमः स्यात् । त्रयाणां पदानां क्रमत्वात् त्रिक्रम इत्युक्तम् । यथा मास्थात्, प्रियधाविशत, पूषाधत्त, धाताधत्त, कृत्वाधत्त, ऊत्याप्र, मावृक्षि, अर्यमायाति, दध्नातनक्ति, महित्वनानाकम्, कृत्वाहरति, दक्षिणावर्तत, ऋचासादयति, कृत्वालभते, भूत्वाहरत भूताविश, भूताविशति, उद्धातारोहति, एते आ इत्युपसर्गमध्यस्थास्त्रिक्रमाः । आदन्तपदमिति किम्? इहागहि विभुः । उच्चान्तमिति किम्? तयेह्या रोहति । उपसर्गपरमिति किम्? कृत्वादित्पृथिवी । आ इति किम्? मा सु भित्थाः । किञ्च षु इति पदं नः इत्युत्तरं सत् अधः पूर्वपदेन सहेत्येतत्पदत्रयस्यापि क्रमः स्यात् । यथा ऊषु णः मो षूणः[2] । इति त्रिक्रमा विंशतिः[3] । नः

---

[1] द्वितीयपदस्यान्ते सति तत्तदादिपदस्य निवृत्तिरिति तुशब्दार्थ इति सर्व । [2] "ह्रस्वस्यानित्यदीर्घं स्यात्तद्धास्याप्युपलक्षणम्" इति वक्ष्यमाणपरिभाषया मो षूण इत्यत्रापि तथेति सर्व । [3] यद्यपि मास्थात्प्रियधाविशत, पूषाधत्त, धाताधत्त, कृत्वाधत्त, ऊत्याप्र मावृक्षि मावृक्षि मोषूणोऽर्यमायाति दध्नातनक्त्यूषु णो महित्वनानाकसूषु ण ऊषु णः कृत्वाहरति दक्षिणावर्ततर्चासादयति कृत्वालभते प्रियधाविशत भूत्वाहरत भूताविश भूताविशत्यासन्दीमुद्धातारोहति चतुर्विंशतिस्त्रिक्रमाः इति चतुर्विंशतिस्त्रिक्रमा वर्तन्ते । तथापि सप्तमचतुर्दशपञ्चदशविंशानां मावृक्षि ऊषु णः ऊषु णः प्रियधाविशत इत्येतेषां चतुर्णामपि पुनरावृत्त्या चतुर्विंशतेः तद्व्यवकलने (२४-४-२०) विंशतिस्त्रिक्रमाः इति यथाश्रुतत्रिक्रमा विंशतिरेवेति उपपन्नमेतत ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परमिति किम्? प्रो ष्वस्मै पुरोरथम्। पदमिति किम्? देवेषु नः। षु इति किम्? कुवित्सु नो गविष्टये। अयं त्रिक्रमविशेषः किमर्थः? स ते, ते, मा, मा इत्युच्यमाने स्वरवर्णाभ्यां पदक्रमयोः तुल्यत्वात् तत्सङ्केतनिश्चयार्थमयमारम्भः। ऊषु णः, मो षूणः इत्यनयोस्तु णत्वप्रत्ययार्थमिति[1] ॥

सकृदादि द्वितीयं द्विः पठेच्चादिपदं सकृत्।
सन्धितः क्रमवच्चेति प्रोच्यते सा जटा बुधैः ॥ ३३ ॥

आदिपदं एकवारं द्वितीयं पदं द्विवारं पुनरादिपदं चशब्दात् द्विवारं अन्तं पदमेकवारं चेत्येतत्पदसर्वस्य यत्र यः सन्धिः प्रसक्तः तत्सन्धिविधिना या संहिता क्रियते सा जटासंज्ञा स्यादिति बुधैः प्रोच्यते। क्रमवदिति प्रतिजटा(टम)न्तेऽपि क्रमविराम इव विरामः स्यादित्युक्तम्। यथा, वा इयमियं वै वा इयम्, इयमग्रेऽग्र इयमियमग्रे, द्वे वाव वाव द्वे द्वे वाव, द्वे इति द्वे, वाव देवसत्रे देवसत्रे वाव वाव देवसत्रे। स ँश्रवा ह ह स ँश्रवास्स ँश्रवा ह, स ँश्रवा इति सं श्रवाः, ह सौवर्चनसस्सौवर्चनसो ह ह सौवर्चनसः इत्यादि विज्ञेयम्। [2]ननु जटायां किम्? लक्षणज्ञानादेव फलं लभेदित्युक्तत्वादिति चेत्, उच्यते। यो नासिकारन्ध्रमाच्छाद्य सुगन्ध(न्धि)द्रव्यं धरति तेन तदनुभवः कथं ज्ञायते? गन्धस्य ह्याघ्राणमेवानुभवः। तद्वल्लक्षणेन समस्तपदानां जटारूपसंहिता यदा क्रियते तदैव तस्य लक्षणानुभवः। केषां लक्षणमित्युक्ते, आगमा, नुस्वार, दीर्घ, लोप विकृत, षत्व, णत्व, रेफत्व, सस्थानोष्मत्व, यत्व, द्वित्व, स्वरैक्या, न्यवर्णत्वो दात्तादि स्वरसंपर्का, न्यस्वरजन्यकम्पादीनां लक्षणमित्यर्थः ॥

त्रिक्रमस्य जटा ज्ञेया ह्युक्त्वा पूर्वं क्रमन्तथा।
पुनरन्तं मध्यमादि पुनराद्यन्तरं परम् ॥ ३४ ॥

---

[1] इति केचिदिति क्वचित्पुस्तके। [2] ननु प्रकृतिसंहिताया इव जटाया अपि किं लक्षणज्ञानादेव फलं लभेदिति चेत् उच्यत इति सर्वं ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वं तावत्क्रममुक्त्वा पुनरन्तं पदं मध्यं आदिं च पुनः आदिपदं अन्तरं मध्यं पदं परं अन्तं पदं चेति सन्धिविधिना या संहिता कथ्यते सेयं त्रिक्रमजटा ज्ञातव्या यथा मास्थात्स्थादा मामास्थात्, आ स्थात्स्थादा स्थात्। ऋचासादयति सादयत्यार्चचासादयति मो षूणो नस्सु मो मो षूणः ॥

अनुलोमः स्वपाठस्स्यात् विलोमस्सन्धिनिर्मितः ॥ ३५ ॥

प्रकृतिपाठ एव द्विपदस्त्रिपदो वा जटायामाद्यन्तस्थः क्रमः अनुलोमसंज्ञः स्यात्। सन्धिनिर्मितः हलादिभिः चतुर्भिः सन्धिभिः [1]स्वेन रचितः क्रमः अनार्षः विलोमसंज्ञः स्यात्। संज्ञायाः प्रयोजनं "अनुलोमेषु तत्कार्यम्" विलोमेऽप्येव तौ ज्ञेयाविति। यथा स्वधा असीत्यनुलोमः। अस्यसि, असि स्वधा, स्वधा स्वधा इति विलोमः। अनूर्ध्वपदसन्धिः विलोमः इत्यर्थः। पुनरन्त्येऽप्यनुलोमः स्वधा असि। एत्रावनुलोमविलोमौ क्रमरूपेण निर्दिष्टौ प्रतिपदद्वयस्य (यं) सन्धिनिदर्शनार्थं। तस्मान्नैकपदस्य जटा। किन्तु "सकृदादि द्वितीयं द्विः पठेच्चादिपदं सकृत्" त्रिक्रमस्य जटा ज्ञेया ह्युक्त्वा पूर्वं क्रमन्तथेति च पूर्वमेवोक्तत्वात् द्वयोस्त्रयाणां वा पदानां जटा वक्तव्या। अत एव स्वधा अस्यासि स्वधा स्वधा असि इति भवति। ननु "नमो नम इत्यादीनां द्वयोः स्वयंकृतसन्ध्यभावान्नात्र विलोमसंज्ञः क्रमः। तथा सति नात्र जटाया अवकाश इति चेत् नायं पक्षः। मूलवचने पदद्वयमात्रस्य जटा विहिता। न तु तत्र पदद्वयं विशेषितमुक्तम्। जटाया एव विलोमसंज्ञकत्वात् अत्रापि तद्विशेषं वक्तुं युक्तम्। तस्मादत्रापि पदद्वयं वा त्रयं वा वक्तव्यमेव। तस्मादत्रापि, नमो नमो नमो नमो नमो नमः इति जटा भवति ॥ [2]

---

[1] हल्सन्धिः विसर्जनीयसन्धिः, अच्सन्धिः स्वरसन्धिश्चेति चत्वारः सन्धयः। [2] कुत्र चित्स्वरवर्णाभ्यां यद्यभेदः पदद्वये। तत्रानुक्रम एवालं न वदेद्व्युत्क्रमादिकम् ॥ इति वचनमाश्रित्य नमो नम इत्यनुक्रमपाठ एव बहुशो दृश्यते। तेन तरति तरति ब्रह्महत्यामित्यादौ वर्णाभेदे सत्यपि स्वराभेदाभावात् तरति तरति तरति तरति तरति तरति इति जटा भवति। सर्वलक्षणमञ्जरीकारेणापि वेदतैजलस्यपङ्क्त्यनुसारेणैव लिखितम्। एतेन आस्यां व्याख्यातृभिः कुत्र चित् स्वरवर्णाभ्यामित्यस्य वचनस्य निर्मूलकत्वं द्योतितम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदं पदं पठेत्ताभ्यां त्रिवारं चोर्ध्वतः पुनः ॥ ३६ ॥

ताभ्यां अनुलोमाविलोमाभ्यां एकैकं पदं त्रिवारं ब्रूयात्। एकैकजटायां पूर्वजटान्तपदस्य परतः पदेन सन्धौ सति पुनस्त्रिरुक्तं स्यात्। तदा पूर्वोत्तरजटास्थं सत् तन्मध्यपदं षड्वारोक्तं स्यात्। एवं षड्वारमिति वाच्ये तदर्धसंख्याप्रयोगोऽर्थान्तिरसूचकः अर्धाद्यनुवाकादिपदयोः पूर्वपदसम्बन्धाभावः तदन्त्यपदयोः उत्तरपदसम्बन्धाभावश्चेति त्रिवारमित्युक्तम्। शिक्षान्तरमतव्यावर्तकोऽयम्। अन्तं पदं क्रमकालवत् पुनः प्रत्येकं इति मध्यस्थं सत् द्विरुक्तं भवत्येव संख्यापूरणार्थम्[1]। यथा कण्वा अभ्यभि कण्वाः कण्वा अभि, अभि प्र प्राभ्यभि प्र, प्र गायत गायत प्र प्र गायत, गायतेति गायत। अत्यासो न नात्यासो अत्यासो न न ये ये न न ये। कर्मणे वां वां कर्मणे कर्मणे वाम्। हव्यँ रक्षस्व रक्षस्व हव्यँ हव्यँ रक्षस्व। रक्षस्वेति रक्षस्व इत्यादि जानीयात्॥

प्रोपावापर्यधि व्युत्सु न्यन्वपाप्यत्याभि प्रति।
परा निस्सन्नवदशाप्युपसर्गाः स्युरत्र हि॥ ३७॥

प्र, उप, अव, आ, परि, अधि, वि उत्, सु, नि, अनु, अप, अपि, अति, अभि, प्रति, परा, निः, सम्, एते, नवदश शब्दा, उपसर्गसंज्ञाः स्युः संज्ञायाः प्रयोजनं "प्रग्रहे ङ्योपसर्गान्त" इति। यथा, प्र णो देवी, उप दधाति, अव रुन्धे, आ मे गृहाः, पुरस्तात्परि दधाति, नाध्यासते, वि वा एतौ, उदायुषा, मासु भित्थाः, न्यन्ये धिष्ण्याः, अन्वह मासाः, अपेत त्रि, अपि कृन्ताम्यस्मे, अत्यभ्यानगाम्, अभ्यस्थात्, प्रति गृह्णाति, परा वै, निर्वपेद्यः, सन्ते वायुः॥

इति संज्ञाप्रकरणम्॥

---

[1] वाक्यपूरणार्थमिति सर्व॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ प्रग्रहप्रकरणम् (२)

अथ प्रग्रह एवान्त उच्यतेऽवग्रहो न चेत् ॥ ३८ ॥

अथेत्ययं अधिकारार्थः। अन्तः पदान्तः वक्ष्यमाणलक्षणोक्तः स्वरः प्रग्रहसंज्ञो भवति अवग्रहो न स्याद्यदि। संज्ञायाः प्रयोजनं "न प्लुते प्रग्रहे सन्धी" त्यादि। यथा, ते एनमभि—अत्राह किमपदान्तोऽपि प्रग्रहः स्यात्? अत्रोच्यते "ऊकारः स्थित" इत्यविशेषेण वक्ष्यति। तनूभिः—सोऽपूत एव। "ओकारोऽप्यकारव्यञ्जनोत्तर" इति च। सो मो वै। अपदान्तयोरनयोः प्रग्रहत्वं मा भूदिति। अवग्रहो न चेदिति किम्? अग्नीषोमौ मा तनूपाः द्वे द्वे सं अगो अर्घं एतदुद्दिश्य पुरस्तादपवादोऽनेन विधीयते॥

ऊकारः स्थित ओकारोऽप्यकारव्यञ्जनोत्तरः ॥ ३९ ॥

पदान्तः स्थितः शाश्वत ऊकारः प्रग्रहः स्यात्। यथा हनू वा एते। मध्वा रजाँसि सुक्रतू। स्थित इति किम् "सू तू नू मिथू मक्षू ऊ। इत्यादि[1]। ओकार इति सान्निध्यात् स्थित इति लभ्यते। स्थितः ओकारः अकारपरः व्यञ्जनपरो वा प्रग्रहः स्यात्। यथा शतक्रतोऽनु ते दायि, अभूदो ते यन्ति, ज्यैष्ठ्याय सुक्रतो। भुवः। तत्परः किम्? विष्णवेहीदम्। स्थित इति किम्? समिद्धो अञ्जन्। ननु विष्णो हव्यँ रक्षस्व इतिवत् विष्णोः स्थानमसीत्यत्र किं न स्यादयं विधिः? उच्यते। सोऽपि विष्णोर्ध्रुवमसीत्यादिवत् षष्ठ्येकवचनत्वात् विसर्गान्त इति परिहारः। अकारश्च व्यञ्जनं च अकारव्यञ्जने, ते उत्तरे यस्मात् सः तथोक्तः॥

[2]स म ह द थ पित्पूर्वोऽप्यथेदेतौ पतीश्रुतिः ॥ ४० ॥

---

[1] आ तूभर मिथूकः नूरणे मक्षूदेववतः इत्याद्यनित्यदीर्घाणां मा भूदिति सर्व । [2] पित्पूर्वश्चाथेदेतौ इति सर्व पाठा। पित्पूर्वो नित्योऽथेदेत्पती श्रुत इति पाठान्तरम्॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

[1] सान्निध्यादोकारो लभ्यते। पूर्वोक्तपरानिमित्ताभावेऽपि कार्यविधानार्थं ओकारं विशिनष्टि। स, म, ह, द, थ, पित्, एवं पूर्वः नित्य ओकारः अकारव्यञ्जनाभ्यामन्यपरोऽपि प्रग्रहः स्यात्। यथा सो एवैषैतस्य मो एषाम् हो इत्याह-इन्दो इत्याह-तथो एवोत्तरे पितो आविशस्व। [2] तत्पूर्व इति किम्? शतक्रतवुद्ध शमिव येमिरे नित्य इति किम्? प्र सो अग्ने। अथेदिति अथेत्ययमधिकारः ईत् ईकारः एत् एकारश्च प्रग्रहत्वेन विशिष्यते इत्येतदधिकृतं वेदितव्यम्। पतीश्रुतिः पती इत्यस्य यत्र यत्र श्रुतिः श्रवणमस्ति तत्र तत्र प्रग्रहत्वं विज्ञेयम्। यथा शुभस्पती इदमहम् श्रुतिरिति किम्? दम्पती वामं प्रियमिन्द्राबृहस्पती इत्यादौ पदैकदेशेऽपि प्रग्रहत्वाय॥

काष्र्णी धी चक्षुषी मुष्टी देवता फल्गुनी अमी।
अहनी श्रपणी हूती सुम्निनी सामनी हरी॥ ४१॥
कल्पयन्ती तपसी नाभ्यैक्षव्या पृषती हुरी।
रिष्यन्ती वाससी दर्वी नः पृथिवी व्यचस्वती॥ ४२॥
जन्मनी वैष्णवी द्यावापृथिवी आहुती कृतौ॥ ४३॥

काष्र्णी धी चक्षुषी, मुष्टी, देवता फल्गुनी, अमी अहनी, श्रपणी, हूती, सुम्निनी, सामनी हरी, कल्पयन्ती, तपसी, नाभी, ऐक्षव्री, आ पृषती, हुरी, रिष्यन्ती वाससी, दर्वी, नः पृथिवी, व्यचस्वती, जन्मनी, वैष्णवी द्यावापृथिवी, आहुती, एतानि (२७) प्रग्रहसंज्ञानि भवन्ति। यथा काष्र्णी उपानहौ। प्रधी तावुक्थ्याः। चक्षुषी वा एते। मुष्टी करोति। पितरो देवता। फल्गुनी नक्षत्रम् देवतेति किम्? सा फल्गुनी यत्तृतीयम्। अमी वा इदमभूवन्। अहनी द्यौरिवासि। वपाश्रपणी प्रहरति। सहूती वनतं गिरः।

---

[1] अत्रापि चशब्देन स्थितः ओकारः इति पदद्वयमन्वादिश्यते इति सर्व॥ [2] पीति किमिति भावः॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुम्नाय सुम्निनी सुम्ने मा धत्तम्-सामनी प्रतिष्ठित्यै-थोजाम्विन्द्र ते हरी-कल्पयन्ती ऊर्ध्वं यज्ञम्-अप्सु दीक्षातपसी प्रावेशयन्-रजतनाभी वैश्वदेवौ-यदश्ववाला ऐक्ष्वी तिरश्ची-युञ्जा पृषती अभूताम्-आ इति किम्? पृषती स्थूलपृषती सहुरी सपर्यात्-अग्निमन्तर्भरिष्यन्ती-वाससी नेष्टापोतृभ्याम्—दर्वीश्रीणीव आसनि-द्यावा नः पृथिवी इमम्-न इति किम्? मही द्यौः पृथिवी च नः-व्यचस्वती संवसाथाम्-उभे निपासि जन्मनी-वलगहनौ वैष्णवी बृहन्-उ द्यावापृथिवी भद्रं-द्यावेति किम्? मही द्यौः पृथिवी च नः-अभितः पुरोडाशमाहुती जुहोति-आ इति किम्? हुती तस्माद्देवाः इति शाखान्तरे। आभ्यां कृतौ पूर्वौ च प्रग्रहौ स्तः-यथा यावती द्यावापृथिवी महित्वा-आविन्ने द्यावापृथिवी घृतव्रते। पुरोडाशमेते आहुती। आभ्यां कृताविति किम्? यावती वै पृथिवी। एते वा इडायै।

रोदसी चोत्तरः पान्यपरो न्वती च ची प्रयत्।

रोदसीत्यत्र अन्त्यः स्वरः प्रग्रहः स्यात्। यथा रोदसी अपृणाज्जायमानः। अस्मात्परश्च प्रग्रहः स्यात्। यथा अन्विन्द्र रोदसी वावशाने। पान्यपर इति पकारादन्यवर्णपरः न्वतीशब्दः प्रग्रहः स्यात्। यथा ओमन्वती तेऽस्मिन् यज्ञे-पान्य इति किम्? मूर्धन्वती पुरोऽनुवाक्या भवति। ची प्रयदिति-प्र, यत्, एवंपरः चीशब्दः प्रग्रहः स्यात्। यथा प्राची प्रेतमध्वरम्-तिरश्ची यदश्ववालः-एवंपर इति किम्? प्राची दिशाम्-प्राची पत्नी-घृताची यज्ञे देवाञ्जिगाति-ची इति किम्? प्रजनने प्रजननम्-यत्र एकादशिनी यदग्नौ॥

नह्यन्योर्ध्वौ समीची ग्री ध्री चक्रे पोर्ध्व आन्मही॥

न हि, इत्येताभ्यामन्यवर्णपरौ क्रमात् समीची ग्री इति शब्दौ प्रग्रहौ स्तः। यथा पश्चात्समीची ताभिः-इन्द्राग्नी च हि देवानाम्। नह्यन्योर्ध्व(ध्वौ) इति किम्? समीचीनामासि-ऐन्द्राग्नी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः

विजयतां भगवान् सहस्रकिरण:

अथ केरलप्रश्नमाला

(श्रीशेषसूरिदैवज्ञविरचिता)

अथ प्रथम उपोद्घातकाण्डः

मङ्गलाचरणम्

यत्संकल्पात्सखगं भचक्रमनिशं भ्रमत्प्रवहनुन्नम् ।
दिवि भुवमभितो दृश्यं स दिशतु भगवान् श्रियः पतिः कुशलम्
॥ १ ॥

यस्योदये जगदिदं प्रबुद्धमखिलं प्रसुप्तमस्तमये ।
स जयति मरीचिमाली साक्षी जीवातुरखिललोकानाम् ॥ २ ॥

गुरुस्मरणम्

निजमतिमन्दरसुमथितहोराक्षीरोदलब्धतत्त्वसुधाम् ।
यो मे पिता दिशदमुं कलये श्रीरामभद्रदैवविदम् ॥ ३ ॥
भातु कविज्योतिर्वित्पडितरत्नप्रथस्य चरणाब्जम् ।
वर्षीयसो गुरुमणेर्गोपालार्यस्य मामके मनसि ॥ ४ ॥

स्वमान्द्यनिवेदनम्

ज्योतिस्तन्त्रे गहने नानाभेदैः समाकुले विपुले ।
किञ्चिदपि न चतुरोऽहं गुरूपदेशेन किमपि कथयामि ॥ ५ ॥

स्वग्रन्थावतरणबीजम्

ज्ञानप्रदीपनामा जैमिन्यपराह्वविश्वनाथकृतः ।
अव्यभिचरितप्राश्निकफलाभिधायी हि केरलग्रन्थः ॥ ६ ॥
अष्टाविंशतिकाण्डः पद्यैरानुष्टुभैर्बहुशः ।
अविवक्षितविपरीताभिधेयबोधिभिरशुद्धपदजटिलैः ॥ ७ ॥
अन्यान्यैः प्रतिकोशं सुदूषितस्तत्तिरोहितं न विदाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ज्ञानप्रदीपग्रन्थकृतो नामद्वयनिरूपणम्

ग्रन्थलिपिमुद्रितैतद्ग्रन्थादर्शेऽस्य जैमिनिः कर्ता ॥ ८॥
मैसूरुपुरीवाणीभाण्डागारस्थतालदलकोशे ।
कर्ता च ग्रन्थस्य स्फुटतरमेतस्य विश्वनाथ इति ॥ ९ ॥
दर्शनतो ग्रन्थकृतो नामद्वयमिति दृढं विनिश्चिनुमः ।

प्रतिज्ञा

तस्माद्बहुलैर्ग्रन्थैरितरैस्तस्यार्थमवगतं कृत्स्नम् ॥ १० ॥
तादृग्ग्रन्थानुदितानन्यान्विषयांश्च कांश्चिदुपयुक्तान् ।
मात्रावृत्तैर्ललितैः स्पष्टं निर्वक्तुमारभे चपलः ॥ ११ ॥

दैवविदामभ्यर्थना

गुणविद्भिर्विद्वद्भिर्ज्योतिर्विद्भिर्मया मिताधियात्र ।
लपिताः प्रमादजाता विषयाः सोढुं कृपालुभिः शक्याः ॥ १२ ॥
प्रश्नाम्बुधिपारीणा विमत्सराः सज्जनाः पनायन्तः ।
मितमपि गुणमपरिमितं मयि प्रसादं वितन्वतां मन्दे ॥ १३ ॥

प्रश्नशास्त्रस्य शङ्कोद्भावनपुरस्सरमारम्भणीयतासमर्थनम्

आनिधनं मनुजानां जातकतन्त्रं हि पूर्वजन्मभवम् ।
दृढकर्मजमशुभशुभं दशामुखैरदृढकर्मजं च फलम् ॥ १४ ॥
अशुभशुभं गोचारैः साष्टकवर्गैर्दृढादृढोभयजम् ।
क्रमशः फलं च योगैस्तादृशमिह जन्मनि ब्रूते ॥ १५ ॥
प्रश्नाभिधतन्त्रमिदं किमर्थमारम्भणीयमिति शङ्का ।
काचिदुदेति तदर्थं विषयविभागोऽथ कथ्यते शास्त्रात् ॥ १६ ॥
प्राग्जन्मजमेतज्जनिजातं चेति द्विधा भवेत्कर्म ।
तत्र पुराकृतकर्मजशुभाशुभं जातकं फलं वदति ॥ १७ ॥
जनिलग्ननवमनाथात्प्राग्जनिवृत्तान्तबोधः स्यात् ।
जन्मनि पुरा कृतानां फलमसतां कर्मणां सतां चाथ ॥ १८ ॥
जनुषीह प्रबलानां कलितानां वा करिष्यमाणानाम् ।
क्रियमाणानां च फलं प्रश्नाभिधतन्त्रमाख्याति ॥ १९ ॥
एतज्जन्मजकर्मजफलभोगो भाविजन्मभावीति ।
कथमत्र जन्मनि भवेत्तत्फलभोगोऽथ कथ्यते तदपि ॥ २० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत्कटतमैरिहत्यैः पुण्यैः पापैरिहैव फलभोगः ।
इत्यभियुक्तोक्तिबलादनुभवतश्चास्य संसिद्धिः ॥ २१ ॥
द्यूताभिसरणवञ्चनमिथ्याऽपथ्यान्नचौर्यवधगवैंः ।
उपकृतिनैराश्यदयासत्याहिंसाप्रियोक्तिधर्मनयैः ॥ २२ ॥
प्रबलैश्चैतैर्दुरितैः सुकृतैरत्र स्फुटा हि फलसिद्धिः ।
प्राग्जनिजानामेतज्जनिबलवत्कर्मणां च फलपक्तेः ॥ २३ ॥
प्रश्नाभिधतन्त्रेण स्पष्टतरं कीर्तनान्नृणां धरणौ ।
सिद्धमिदं होरायाः प्राक्तनकर्मोत्थफलकथनम् ॥ २४ ॥
अत्रत्यविबलकर्मजभाविभवोत्पत्स्यमानफलपक्तेः ।
एतज्जनिभवभोगानाश्यायाः पूर्वजन्मजातायाः ॥ २५ ॥
भाविन्याः फलपक्तेः कथनं च विलग्नतः सुताधीशात् ।
तस्मात्पूर्वैतज्जनिकर्मफलोद्बोधनाय शास्त्रमिदम् ॥ २६ ॥
आरब्धव्यं प्रश्नाभिधमिति निरणायि शास्त्रपथात् ।
कर्मफलानुभवोऽयं प्राग्जन्मभवोऽत्र जन्मनि च जातः ॥ २७ ॥
इति तत्कथमवगन्तुं शक्यं तदपि प्रकाश्यते शास्त्रात् ।
होराप्रश्नोद्भवयोः सदसत्फलयोर्यदा विसंवादः ॥ २८ ॥
स तदैतज्जनिजातो यदा तयोरैकरूप्यं स्यात् ।
स तदा प्राक्तनजन्मोद्भव इत्युक्तं मुनिप्रवरैः ॥ २९ ॥

प्रश्नजन्मकालयोः साम्यकथनम्

प्रश्नसमयस्य जन्मावसरस्य च साम्यमथ वक्ष्ये ।
सदसत्फलाप्तिबीजं कर्मैव निगद्यते दैवम् ॥ ३० ॥
तच्चोदनया जीवः कुक्षौ गर्भात्मना वसेन्मातुः ।
स तयैव मातृगर्भान्निपतेद्बालात्मना भूमौ ॥ ३१ ॥
इत्थं शुभाशुभेन प्रचोदितः प्राश्निको हि दैवेन ।
ज्योतिर्विदः सकाशं समुपैति प्रश्नसमयोऽतः ॥ ३२ ॥
जनिकालसमः प्रोक्तो ग्रन्थैश्च प्रश्नमार्गाद्यैः ।
अत एव केचिदाहुः प्रश्नविदः प्रश्नकालिकैः खचरैः ॥ ३३ ॥
गतवर्तमानगस्योद्भवकर्मफलं शुभाशुभं सर्वम् ।

दैवज्ञलक्षणम्

सत्यवचाास्त्रिस्कन्धज्योतिर्नयपारगः सदाचारः ॥ ३४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जपसिद्धमहामन्त्रो देवार्चनलालसोऽस्तु दैवज्ञः।

प्रष्टृलक्षणं प्रश्नस्थलकालनिरूपणं च

प्रष्टा सदक्षिणाफलताम्बूलः प्रश्रितः सविश्वासः ॥ ३५ ॥
दैवविदं परिपृच्छेन्न कदा चन रिक्तपाणिः सन्।
संसदि निशि सन्ध्यायां वर्त्मन्यशुचिस्थले जलोपान्ते ॥ ३६ ॥
कान्तारेऽनलसविधे वैधृतिसंक्रान्तिदर्शादौ।
अशुभक्रियास्थलेऽपि प्रष्टा न कदापि परिपृच्छेत् ॥ ३७ ॥
दैवविदं देवमिव प्रतोष्य भक्त्या धनादिभिश्चार्हैः।
पृच्छायां रचितायां फलसिद्धिः स्यादितोऽन्यथा नैव ॥ ३८ ॥
गुप्तप्रकाशनभयान्मतिकालुष्याद्विभेदतो हरितः।
हृद्विक्षेपोद्वेगादिभिश्च दैवज्ञसावधानत्वम् ॥ ३९ ॥
उक्तेषु स्थलकालेष्वेषु न सिध्येदिति ब्रुवन्त्यार्याः।

प्रश्नोपकरणानि

चिन्तां त्रिसमयजातां केन्द्रस्य बलाबलं गृहद्युसदाम् ॥ ४० ॥
वृणिजातियोजनानि च वर्णान्युग्मैकनृवनितासंज्ञाः।
द्विपदचतुष्पदबहुपदपतगाद्या रजनिदिवससन्ध्याख्याः ॥ ४१ ॥
दिग्घोष्ट्रस्थलभेदान्पृष्ठोभयकोदयाभिधा द्युसदाम्।
तुङ्गस्वनीचरिपुहितराशीलक्ष्माकृती रसवयांसि ॥ ४२ ॥
ह्रस्वसमदीर्घसंज्ञाः शृङ्गं कालं ततश्छत्रम्।
आरूढभमन्यान्यपि परिशील्य भृशं फलं वदेद्विबुधः ॥ ४३ ॥

काण्डानुक्रमणिका

पूर्वमुपोद्घातोऽथो संज्ञा पश्चात्तृतीय आरूढः।
धातुर्मूलं जीवो नष्टं छत्रं च चिन्तना तदनु ॥ ४४ ॥
लाभालाभं रोगो मरणं भुक्तिस्ततः स्वप्नः।
शकुनं तदनु विवाहः कामः पुत्रोद्भवः सुतारिष्टम् ॥ ४५ ॥
आयुधमथो हि शल्यं कूपः सेनागमो यात्रा।
सरिदागमनं वृष्टिश्चार्घो नौसिद्धिरिति काण्डाः ॥ ४६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टाविंशतिरुक्ताः क्रमशोऽत्र प्रश्नमालायाम् ॥ $\frac{1}{2}$ ॥

आद्य उपोद्घाताख्यः काण्डः श्रीशेषसूरिदैवविदा ।
सार्धरसवेदसङ्ख्यैः पद्यैर्बद्धः समाप्तिमगात् ॥

इति प्रश्नमालायां प्रथम उपोद्घातकाण्डः ॥

अथ द्वितीयः संज्ञाकाण्डः

मित्रग्रहाः

जीवो द्युमणेः शशिनो जीवज्ञौ भूभुवः सितेन्दुसुतौ ।
व्यर्काश्चान्द्रेः सूरेर्विकुजाः काव्यस्य वीन्द्वर्काः ॥ १ ॥
विकुजेन्द्विनाः शनेरिति सुहृदः कथिताः क्रमाद्द्युसदाम् ।

मित्रराशयः

तत्तेषां भवनानि च मित्राण्युक्तानि कालज्ञैः ॥ २ ॥

शत्रवो ग्रहा राशयश्च

मित्रेभ्योऽन्ये खेटा गृहाश्च रिपवो भवन्ति किमु वाच्यम् ।

स्वक्षेत्राणि

सिंहस्य रविश्चन्द्रः कर्कटकस्याजकीटयोर्भौमः ॥ ३ ॥
मिथुनाबलयोः सौम्यस्तिमिधनुषोः सूरिरुक्षतुलयोस्तु ।
भृगुसूनुर्मृगघटयोः शनिरिति भवनाधिपतयः स्युः ॥ ४ ॥

ग्रहाणामुपग्रहाणां चोच्चराशयः

रविशशिपरिधिबृहस्पतिधूमज्ञशनैश्चराहीनाम् ।
शक्रधनुषः कुजाण्वोर्भृगुजस्य च मेषतः क्रमात्तुङ्गाः ॥ ५ ॥

मतान्तरे राहोस्तुङ्गराशिः

तमसस्तुङ्गो वृषइति के चन होराविदः प्राहुः ।

धूमाद्युपग्रहानयनम्

जलधि४गृहैर्विश्वां १३ शैः सहितेऽर्के धूमसंज्ञः स्यात् ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धूमे चक्राद्रहिते व्यतिपातः स्यादिति प्राहुः ।
अत्र सषड्भे परिधिश्चक्रादस्मिंश्च्युते तु शक्रधनुः ॥ ७ ॥
अस्मिन्सप्तदशांशैर्युते तु केतुः स एवाणुः ।
लम्पाके कुम्भोऽणोरुच्चमिति श्लोकतुर्यचरणस्य ॥ ८ ॥
व्याख्यायामणुशब्दः केत्वभिधायीति सुस्पष्टम् ।

ग्रहाणामत्युच्चांशाः

दशमं तृतीयमथचाष्टाविंशं तदनु पञ्चदशमथ च ॥ ९ ॥
पञ्चममत्युच्चांशं विदुर्बुधाः सप्तविंशमथ विंशम् ।
तुङ्गगृहेषु खगानामर्कादीनामजाद्येषु ॥ १० ॥

ग्रहाणां नीचराशयस्तदंशाश्च

तुङ्गेभ्यः सप्तमभान्युक्तानि च भानि तैर्भागैः ।

धूमादीनां राहोश्च नीचराशयः

धूममुखोपखगानामगोश्च नीचाः स्वतुङ्गतोऽस्तगृहाः ॥ ११ ॥

राहोर्मित्रस्वशत्रुराशयः

युगतौलिनक्रकन्याचापझषा मित्रभान्यहेः कुम्भः ।
स्वर्क्षमजकार्किहर्यो रिपुभवनानीति जानीयात् ॥ १२ ॥

मतान्तरे राहोः स्वक्षेत्रम्

के चन केरलविबुधास्तमसः कन्या स्वगेहमित्याहुः ।

केन्द्रचतुरश्रसंज्ञाः

तनुसुखमदखान्याहुः केन्द्राणि सुखाष्टमे च चतुरश्रम् ॥ १३ ॥

पणफरापोक्लिमकोणसंज्ञाः

केन्द्रात्परं पणफरं तस्मादापोक्लिमं परं स्थानम् ।
पञ्चमनवमे कोणं चाहुर्होराप्रवीणधियः ॥ १४ ॥

चिन्तानिरूपणम्

दशमे चिन्तां तुर्ये स्वप्नं छत्रे तु मुष्टिं च ।
अस्ते वाऽऽरूढं वा नष्टं च वदेद्बुधप्रवरः ॥ १५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृष्ठोभयशीर्षोदया राशयो ग्रहाश्च

अजवृषकर्कटकार्मुकमकराः पृष्ठोदयास्ततो मीनः ।
उभयोदयोऽवशिष्टाः शीर्षोदयराशयः समधिगम्याः ॥ १६ ॥
पृष्ठोदयाः कुजार्कजसूर्या द्वन्द्वोदयौ शिखिहिमांशू ।
गुरुभृगुफणिनः शीर्षोदयाः स्युरेवं विजानीयात् ॥ १७ ॥

केन्द्रवशाद्ग्रहाणां राशीनां च बलविवरणम्

लग्ने बलिनौ ज्ञगुरू नृगृहास्तत्स्था यदि प्रबलाः ।
नभसि कुजार्कौ सबलौ तद्गतपशुभानि बलवन्ति ॥ १८ ॥
अस्ते सौराही तु प्रबलौ तत्स्थं च कीटभं बलवत् ।
तुर्येऽब्जभृगू बलिनौ तत्स्थौ बलिनौ च जलचरौ राशी ॥ १९ ॥

राशीनां स्वरूपाणि

घटचान्नरो नृमिथुनं सगदावीणं ससस्यदहना स्त्री ।
प्लवगा नरोऽश्वजघनश्चापी मनुजस्तुलाधरो नक्रः ॥ २० ॥
मृगवदनो मत्स्यौ स्तः शेषा निजनामसदृशरूपाः स्युः ।

द्विपदादयो राशयो ग्रहाश्च

द्विपदाश्चापादिमदलयुगघटकन्यातुलाधराः प्रोक्ताः ॥ २१ ॥
चापान्तिममकरादिमदलाजवृषभा हरिश्च पशवः स्युः ।
मकरापरदलकर्कटमीना जलराशयः कथिताः ॥ २२ ॥
अलिकर्किणौ बहुपदौ मृगान्तिमझषौ स्मृतौ विहगौ ।
कथिता होराविद्भिर्द्विपदा गुरुसौम्यभृगुपुत्राः ॥ २३ ॥
शन्यर्कारा: पशवः शशिसर्पौ बहुपदौ द्विजौ ज्ञशनी ।

ग्रहाणां गमनरीतिः

शशिभुजगौ जानुचरावन्ये खेटाः स्मृताः पद्गाः ॥ २४ ॥

छत्रज्ञानाय वीथीनिरूपणम्

वृषयुग्मकर्किसिंहारूढानां वीथिका स्मृता मेषः ।
अजकन्यातौलिझषारूढानां वीथिका वृषभः ॥ २५ ॥
कौर्पिधनुर्मृगकलशारूढानां वीथिका मिथुनः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिगारूढचक्रलक्षणम्

दैवज्ञः स्वाध्युषितं स्थलमभितो दैर्घ्यविस्तरयोः ॥ २६ ॥
विरचय्य पञ्च पञ्च क्रमाद्विभागान्समांस्तदनु ।
पूर्वापरगा याम्योत्तरगाश्च लिखेत्क्रमादृज्वीः ॥ २७ ॥
रेखा एवं करणे षोडश कोष्ठा हि जायन्ते ।
अपनेयं तेष्वन्तः कोष्ठचतुष्टयमिदं स्थलं भवति ॥ २८ ॥
दैवविदुपवेशार्हं ब्रह्मस्थानं तदित्याहुः ।
कोष्ठेषु तेषु सव्यक्रमेण विदिशः स्फुटं ज्ञेयाः ॥ २९ ॥
ईशादीनां कोष्ठैरेकैकैरिन्दु १ वेद ४ हय ७ दिग्भिः १० ।
प्राच्याद्याः ककुभस्तु द्विद्विमितैः कोष्ठकैः शिष्टैः ॥ ३० ॥
तत्स्यादेवं प्राच्यां नेत्र २ गुणौ ३ याम्यककुभि बाण ५ रसौ ६ ।
वारुण्यां वस्व ८ ङ्कौ ९ सौम्यदिशायां शिवा ११ कौं १२ स्तः ॥३१॥
कोष्ठौ क्रमेण तदनु न्यसनं वक्ष्यामि तेषु राशीनाम् ।
प्राच्यादिषु मेषादिषु राशी द्वौ द्वौ दिशासु विन्यस्यौ ॥ ३२ ॥
वह्न्यादिकोणकेषु द्वन्द्वाद्या द्वितनुराशयश्च तथा ।
आरूढचक्रमेवं स्यात्तस्मिन्यत्र कोष्ठके प्रष्टा ॥ ३३ ॥
तिष्ठति तत्र यदृक्षं तत्स्यादारूढमित्याहुः ।
प्रष्ट्राधिष्ठितराशेरारूढाख्या तु सार्थैव ॥ ३४ ॥
मेषादिमवनितान्ताः स्वस्वास्तगृहाश्च चक्रेऽत्र ।
प्रतिसूत्रैरन्योन्यं पश्यन्तीति स्फुटं सुधियाम् ॥ ३५ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आरूढचक्रम्

प्रा. २



प. २

रविशशिनोः कारकताकथनम्

भानुः पुंसो नभसः प्राणस्य च कारकोऽथ शीतरुचिः ।
वनिताया वसुधाया देहस्य च कारकः प्रोक्तः ॥ ३६ ॥
एवं संज्ञाकाण्डो रचितः श्रीशेषसूरिणा पद्यैः ।
तर्कगुणैर्ललिततमैर्द्वितीयीकः समाप्तिमगात् ॥

इति प्रश्नमालायां द्वितीयः संज्ञाकाण्डः

अथ तृतीय आरूढकाण्डः

बुध्वारूढं प्रष्टुस्तद्वीथीं वीक्ष्य यावती सा स्यात् ।
आरूढात्तावत्या विलग्नभात्संख्यया भवेच्छत्रम् ॥ १ ॥

अत्र मतान्तरम्

मत्वारूढं तरणे राशिं वीथीममुष्य विज्ञाय ।
गणयित्वारूढात्तां तावत्या संख्यया भवेल्लग्नात् ॥ २ ॥
यद्भं तच्छत्रं स्यादिति के चन सूरयः प्रभाषन्ते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रहदृष्टिपरिमाणं तद्बलं च

द्युसदामस्ते पूर्णं चतुरश्रे पादहीनमथ कोणे ॥ ३ ॥
अर्धं दशमे चरणं सहजे लाभे तु पादार्धम् ।
वीक्षणममुष्य फलमपि मानानुगुणं विशेषोऽत्र ॥ ४ ॥
रविशशिसितसौम्यास्तु प्रबलाः परिपूर्णवीक्षणे सूरिः ।
अर्धेक्षणे बलीयांस्त्रिचरणपादार्धयोर्बली भौमः ॥ ५ ॥
पादेक्षणे बली शनिरासां पूर्णं फलं हि दशाम् ।
अविशेषात्सर्वेषां सप्तमदृष्टौ बलं फलं च समम् ॥ ६ ॥

उपग्रहाणां राहोश्च दृष्टयः

धूममुखोपखगानामगोश्च दृक् सप्तमाश्रिता कथिता ।

राशीनां ग्रहाणां च दृष्टिस्वरूपाणि

तिर्यक् पश्यन्ति गृहास्तिर्यञ्चो मानुषास्तु समनेत्राः ॥ ७ ॥
ऊर्ध्वेक्षणौ विहङ्गावधोदृशौ बहुपदौ च राशी स्तः ।
विधुजीवौ समदृष्टी स्यातामूर्ध्वेक्षणो भानुः ॥ ८ ॥
पश्यत्यारोऽपाङ्गैः कवीन्दुजौ पश्यतोऽधस्तात् ।
अहिमन्दावेकदृशाविति जानीयाद्विविच्य सुधीः ॥ ९ ॥

राशीनां ग्रहाणां च दिङ्निरूपणम्

नष्टस्थलबोधाय प्राच्यां मेषो धनुर्हरी वह्नौ ।
उक्षा तु दक्षिणस्यां नैरृत्यां नक्रवनिते हि ॥ १० ॥
मिथुनः पश्चाद्वायौ तुलाघटौ कर्कटश्चोदक् ।
अलिमीनावीशदिशीत्याहुः प्रश्नाब्धिपारीणाः ॥ ११ ॥
रविभृगुकुजफणिशनिशशिबुधधिषणाः प्राङ्मुखाशेशाः ।

पुंस्त्रियो राशयो ग्रहाश्च

अजयुगचापतुलाघटसिंहाः पुरुषाः स्त्रियोऽन्ये स्युः ॥ १२ ॥
रविकुजगुरवः पुरुषा भृगुशशिभुजगाः स्त्रियः ।

नपुंसकग्रहाः

परे क्लीबाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युग्मैकनरस्त्रियो राशयो युग्मैकनरा ग्रहाश्च

अथ विज्ञेयाः सुधिया युग्मनरास्तौलियुग्मघटचापाः ॥ १३ ॥
एकाकिनौ पुमांसौ मेषहरी युग्मसुन्दर्यौ ।
मृगमीनौ यमकर्कटकीटास्त्वेकाकिसुन्दर्यः ॥ १४ ॥
बुधगुरुभृगुशनिभुजगा युग्मनराः सूर्यचन्द्ररुधिरास्तु ।
एकनराश्चोरादेर्द्वन्द्वा द्वन्द्वावबोधाय ॥ १५ ॥

सात्विकराजसतामसग्रहाः

सत्वोपेताः शशिगुरुरवयो बुधभार्गवौ रजस्सहितौ ।
अथ तामसौ कुजार्की फणिशिखिनावतितरां तमःप्रचुरौ ॥ १६ ॥

पापाः शुभा राशयो ग्रहाश्च

पापशुभाम्बरगाणां गृहाः क्रमात्पापशोभनाभिख्याः ।
अर्कक्षीणेन्दुकुजासिताहिशिखिनः स्मृताः पापाः ॥ १७ ॥
तैरन्वितो बुधः स्यात्पापः शिष्टाः शुभा ज्ञेयाः ।
कृष्णाष्टम्यपरार्धश्वेताष्टम्यादिमार्धमध्यगतः ॥ १८ ॥
हिमरश्मिः क्षीणः स्यात्तदन्यथास्थः शुभश्च पूर्णश्च ।

ब्राह्मणक्षत्रियवैश्यशूद्रा राशयो ग्रहाश्च

विप्राः कर्क्यलिमीनाः क्रियहरिचापा नृपास्ततो वैश्याः ॥ १९ ॥
घटयुग्मतुलाः शूद्रा वृषमृगकन्याः प्रकीर्तिताः सद्भिः ।
विप्रौ गुरुशीतांशू नृपौ कुजार्कौ ततो बुधो वैश्यः ॥ २० ॥
भृगुजः शूद्रो नीचावार्किभुजङ्गाविति स्मृता जातिः ।

राशीनां ग्रहाणां च वर्णाः

चोरादिवर्णमतये रक्ताश्चापाजकेसरिणः ॥ २१ ॥
कर्क्युक्षतुलाः शुक्ला हरिताः कुम्भालिमीनकाः कृष्णाः ।
युगवनितानक्रा रविररुणः श्वेतः शशी कुजो रक्तः ॥ २२ ॥
श्यामः सौम्यः पिङ्गो गुरुर्भृगुर्निर्मलः कृष्णौ ।
शनिभुजगाविति विबुधा विविच्य वर्णान्प्रभाषन्ते ॥ २३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्रहाणामाकृतयः

अथ चतुरा वृत्ता कृशमध्या तदनु च त्र्यस्रा ।
आयतवृत्ताष्टास्रा क्रमशश्चतुरस्रदीर्घा च ॥ २४ ॥
दीर्घा चेति प्रोक्ता आकृतयः सूर्यमुख्यानाम् ।

राशीनां ग्रहाणां च किरणाः

वसुशिवरसशिवगुणरसजलनिधिदशविश्वतर्कवेदरदाः ॥ २५ ॥
मेषादीनां किरणाः प्रकीर्तिताः प्रश्नमालायाम् ।

अत्र मतद्वयम्

कचित्प्राहुर्विबुधाः कुलीरघटमेषतौलीनाम् ॥ २६ ॥
अष्टौ घृणयो वृषमृगमिथुनानां षट् हरेः सप्त ।
कन्याधनुषोरीशा वेदाः कौर्पेर्झषस्य भानीति ॥ २७ ॥
अथ केचन दैवज्ञा गिरिवसुशरवह्निगिरिशिवकराब्धीन् ।
रसदशवसुभानीति प्राहुर्मेषादितः किरणान् ॥ २८ ॥
बाणसमिद्गिरिनवदशनृपवेदाः सूर्यतः क्रमात्किरणाः ।

योजनस्वरूपम्

अष्टाभिर्यवमध्यैरङ्गुलमथ तैः करो जिनप्रमितैः ॥ २९ ॥
दण्डः करैश्चतुर्भिः क्रोशो द्विसहस्रमितदण्डैः ।
योजनमुक्तं क्रोशैश्चतुर्भिरिति योजनस्वरूपमिदम् ॥ ३० ॥
न्यूनाधिकभावेन प्राज्ञैरेकस्य योजनस्योक्ता ।
पञ्चमितमैलिनाम्नी भितिरिति धीमान्विजानीयात् ॥ ३१ ॥

राशीनां ग्रहाणां च योजनानि

वसुशिवरसशिवजलनिधिरसशिखिविश्वानि दश शरा वेदा ॥
नेत्रं च योजनानीत्याहुरजातप्रश्नतन्त्रपारीणाः ॥ ३२ ॥
रविसौम्यरविसुतानामष्टौ षोडश गुरोस्तु भृगुजस्य ।
नव शैला भूसूनोः शशिनो वसुधेत्यनुक्रमशः ॥ ३३ ॥
प्रोक्तानि योजनानि स्तेनाध्वादेः प्रमाणाय ।

ग्रहाणां वयांसि

वक्ष्ये क्रमाद्वयांसि ब्रध्नस्य खसायकान्विधोः खाश्वान् ॥ ३४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षोडश कुजस्य चान्द्रेर्विंशतिमिज्यस्य दशनांश्च ।
शुक्रस्याश्वान्सौरेः फणिनश्च शतं पुरातनैर्ग्रन्थैः ॥ ३५ ॥

ह्रस्वसमदीर्घा ग्रहाः

विधुकुजशनयो ह्रस्वा रविशुक्रौ मध्यमौ बुधाहीज्याः ।
दीर्घा इति समुदीर्णाश्चोरादेराकृतेर्विवेकाय ॥ ३६ ॥

ग्रन्थान्तरे ह्रस्वसमदीर्घा राशयः

ह्रस्वसमदीर्घसंज्ञा राशीनां केचिदाहुराचार्याः ।
कल्याणवर्ममुख्या वक्ष्याम्यत्रैतदुपयुक्तम् ॥ ३७ ॥
ह्रस्वास्तिमिगोजघटा मिथुनधनुःकार्किमृगमुखास्तु समाः ।
वृश्चिककन्यामृगपतिवणिजो दीर्घाः समाख्याताः ॥ ३८ ॥

ग्रहाणां रसाः

अथ विज्ञेयाः सुधिया कटू रसो भास्करस्य शीतांशोः ।
क्षारः क्रूरः कुभुवस्तुवरश्चान्द्रेर्गुरोर्मधुरः ॥ ३९ ॥
अम्लो भृगोः शनैश्चरभुजङ्गयोस्तिक्तकश्चेति ।

ग्रहाणां लाञ्छनानि

चोरादीनां लक्ष्मज्ञानाय कुजार्कजीवविदाम् ॥ ४० ॥
दक्षिणतो लक्ष्म स्याद्वामे फणिचन्द्रशुक्रमन्दानाम् ।
भानोः कट्यां शशिनो मूर्ध्नि धरानन्दनस्य पृष्ठे तु ॥ ४१ ॥
कक्षे बुधस्य सूरेरंसे वदने भृगोः शनेरूरौ ।
फणिनः पदे च सन्तो विभज्य कथयन्ति लक्ष्माणि ॥ ४२ ॥

ग्रहाणां शृङ्गाणि

भुग्नविषाणौ ज्ञरवी हिमरश्मिः शृङ्गहीनः स्यात् ।
ह्रस्वविषाणः कुसुतो जीवकवी दीर्घशृङ्गौ स्तः ॥ ४३ ॥
भग्नविषाणौ फणिरवितनयाविति शृङ्गभेद उन्नेयः ।

चरस्थिरोभयराशयस्तदवस्थाश्च

अजकर्कितुला नक्राश्चराश्चरन्त्युक्षसिंहकीटघटाः ॥ ४४ ॥
तिष्ठन्त्यचरा युगझषकन्याचापाः स्वपन्त्युभयाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राशीनां स्थलानि

अजचापौ वनभूमौ कन्यामिथुनौ पुरे हरिः शैले ॥ ४५ ॥
मृगतौलिझषाः सलिले नद्यां कर्की वृषस्तु कुल्यायाम् ।
जलकुम्भे कुम्भोऽलिः कूपजले निवसतीत्याहुः ॥ ४६ ॥

अत्र मतद्वयम्

वनकेदारारामाः कुल्यागिरिकाननापगातत्व्यः ।
वापीतटाकतटिनीजलघटकूपाः स्थलान्यजात्केचित् ॥ ४७ ॥
घटकन्यायुग्मतुला ग्रामेऽटव्यामजालिहरिचापाः ॥
शिष्टा जलेषु च वसन्त्येवं समुदीरितं कैश्चित् ॥ ४८ ॥

ग्रहाणां स्थलानि

नभासि वने वार्यम्णः सलिले भृगुचन्द्रयोर्वने भुवि वा ।
कुभुवः पुरनिष्कुटयोर्विदो गुरोः पत्तने विहायसि वा ॥ ४९ ॥
मन्दस्य वने सङ्करभुवि वा फणिनो बिले वासः ।
प्रबलखगेन निवासं कथयेन्नष्टस्य वस्तुनः कुशलः ॥ ५० ॥

अत्र मतद्वयम्

भुवि रविकुजमन्दानां गुरुभृग्वोः खे निवासमिन्दुविदोः ।
अभ्यन्तरे परे जगुरथ भूरुच्चा रवेर्भृगोः सेन्दोः ॥ ५१ ॥
उदकं भूभवगुर्वोः शिलातलं सौम्यसर्पयोर्नाकुः ।
सौरेरूषरभूमिः स्थलमित्यन्ये बुधाः प्राहुः ॥ ५२ ॥

राशीनां ग्रहाणां च निशादिसंज्ञाः

पृष्ठशिरोद्वन्द्वोदयगृहखेटा रजनिदिवससन्ध्याह्वाः ।

राशीनां निशादिसंज्ञाविषये मतद्वयम्

रवियुतराश्याद्याः स्युर्ग्रहास्तमीदिवससन्ध्याह्वाः ॥ ५३ ॥
इति केचिदाहुरपरे चराचरद्वन्द्वभैस्तु ताः संज्ञाः ।

ग्रहाणां कालाः

भानोस्तु मासषट्कं विधोर्मुहूर्तो दिनं कुजस्य विदः ॥ ५४ ॥
मासौ मासः सूरेर्भृगोस्तु पक्षः शनेर्वर्षम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अत्र विशेषः

खेटेषूच्चर्क्षेषु क्रमाद्घटीं स्वीयभेषु दिनमेकम् ॥ ५५ ॥
मासं मित्रर्क्षेषु द्विषद्भनीचेषु वत्सरं चाहुः ।

यामचक्रविन्यसनविधिर्ग्रहप्रतिसूत्रं चिन्तायास्त्रैकालिकत्वनिरूपणं च

याम्योत्तरगाः पूर्वापरगाश्च चतुश्चतूरेखाः ॥ ५६ ॥
लेख्या एवंकरणान्नवकोष्ठा हि प्रजायन्ते ।
कोष्ठेषु तेषु मध्यमकोष्ठं ब्रह्मस्थलाख्यमपहाय ॥ ५७ ॥
तेष्वङ्क्याः प्राच्याद्याः क्रमशोऽष्टौ धीमता ककुभः ।
अर्कारजीवविद्भृगुशनिशशिभुजगाः क्रमाद्यामैः ॥ ५८ ॥
विचरेयुः प्रागादिषु किन्त्वेते वारनाथाद्याः ।
प्रागाद्याद्ये यामे द्वैतीयीके तु वह्निकोणादि ॥ ५९ ॥
याम्यात्तृतीययामे क्रमादुपर्येवमुन्नेयम् ।
एवं स्थिते रवेर्भृगुरारस्यार्किर्गुरोर्विधुः फणिनः ॥ ६० ॥
चान्द्रिरिति प्रतिसूत्रं मिथो दिशास्वीरयेद्धीमान् ।
अर्कादिवासरेषु प्रतियामं विलिखितैः स्फुटं चक्रैः ॥ ६१ ॥
पद्यानामेतेषामर्थः सुगमो भवेत्सुधियः ।
आरभ्य वारनाथाध्युषितां ककुभं दिशं यावत् ॥ ६२ ॥
प्रष्टुर्विगणय्य सुधीः क्रमशो भूतं ततो भावि ।
साम्प्रतिकं च ब्रूयाच्चिन्तनमनुयोक्तुरवहितस्वान्तः ॥ ६३ ॥

चिन्तायास्त्रैकालिकत्वकथने मतान्तरम्

उदयादारूढं यदि भूतं रव्यग्निनिधिरसगृहेषु ।
साम्प्रतिकं मुनिगगनाम्बुभेषु भव्यं शराक्षिहरवसुषु ॥ ६४ ॥
प्रष्टुश्चिन्तनमन्ये पुरातनाः प्राश्निकाः प्रोचुः ।
अत्रोदाहरणाय ब्रध्नदिनस्यैव यामचक्राणि ॥ ६५ ॥
अष्टौ प्रथमप्रभृतिप्रहराणां विलिखितैर्ग्रहैर्दिक्षु ।
सार्धं लिखितान्येवं वारपचन्द्रादियामचक्रविधिः ॥ ६६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रविवारस्याष्टौ यामचक्राणि

प्रा

ई	रा	र	कु
उ	च	प्रथमयामस्य	गु
वा	श	शु	बु

आ	च	रा	र
द	श	द्वितीययामस्य	कु
नै	शु	बु	गु

प

श	च	रा
शु	तृतीययामस्य	र
बु	गु	कु

शु	श	च
बु	चतुर्थयामस्य	रा
गु	कु	र

बु	शु	श
गु	पञ्चमयामस्य	च
कु	र	रा

गु	बु	शु
कु	षष्ठयामस्य	श
र	रा	च

कु	गु	बु
र	सप्तमयामस्य	शु
रा	च	रा

र	कु	गु
रा	अष्टमयामस्य	बु
च	श	शु

एवं सोमवारादीनां यामचक्राणि विलिख्य ज्ञेयानि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दामोदरः—(अर्गलीभूय) अत एव पृच्छामि महाराजः कः,

रजकः—ळे, जो महाळाओ सो एळ, (छाया–रे, यो महाराजस्स एव)

नीलाम्बरः—तन्नाम,

दामोदरः—(सस्मितं) कथयति कथयति,

रजकः—(सक्रोधभ्रूभङ्गं) ळे मुंच मग्गं, (नुदति)–(छाया–रे मुञ्च मार्गम्)

दामोदरः—(अर्गलीभूय) कथय, कथय,

रजकः—ळे बाळो वि कसणो विअ परक्कमासि (सस्मितं) वच्छ मुञ्च मग्गं आदिक्कंतो काळो, (छाया–रे बालोऽपि कृष्ण इव पराक्रमसि, वत्स, मुञ्च मार्गं, अतिक्रान्तः कालः)

नीलाम्बरः—कृष्णः कः,

रजकः—किण्णु खु, ण जाणासि कसणं (छाया–किन्नु खलु, न जानासि कृष्णम्)

नीलाम्बरः—न जानामि,

रजकः—गोउळे वट्टइ, देण डिभत्तणम्मि माळिदा पूदणा, (छाया–गोकुले वर्तते, तेन डिम्भत्वे मारिता पूतना)

दामोदरः—कथं पूतना,

रजकः—सअडासुळो वि, (छाया–शकटासुरोऽपि)

दामोदरः—हन्त?

रजकः—दावमेत्तं ण हि, त्तिणवत्तो केसी, अळिट्ठो, घेणुओ अण्णो वि जो को, (छाया–तावन्मात्रं न हि, तृणावर्तः, केशी अरिष्टः, धेनुकः, अन्योऽपि यः कः)

दामोदरः—महदिदमाश्चर्यम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रजकः—तस्स जेट्टभादा नीळंबळो वि परक्कमे कसणं सणुकुणइ, (छाया—तस्य ज्येष्ठभ्राता नीलाम्बरोऽपि पराक्रमे कृष्णमनुकरोति)

दामोदरः—तस्य भ्रातापि?

रजकः—आम, तस्स मादुळेण अह्माणं महाळाएण घणूमहस वच्छळेण आणअि ताणं दोह्णं अ माळणकए चाणूळमुट्टिओ आ आदिट्ठाओ, (छाया—आम्, तस्य मातुलेनास्माकं महाराजेन धनुर्महोत्सवच्छलेनानीय तयोर्द्वयोश्च मारणकृते चाणूरमुष्टिकौ आदिष्टौ)

दामोदरः—किमिदानीमायाति?

रजकः—अहइं अणेदुं अक्कूळो प्पासिदो, (छाया—अथकिं, आनेतुमक्रूरः प्रेषितः)

दामोदरः—किमस्माकमप्यस्ति प्रवेशः?

रजकः—अहइं, ताणं णिजुद्धकए एक्को सहामंडवो काळिदो हंत-आदक्कंतो काळो, महूसवणिमित्तं महाळाअस्स समप्पणिज्जं अमुळ्ळं एदं संसुअं, (छाया—अथकिं, तयोर्नियुद्धकृते एकस्सभामण्डपः कारितः, हन्त, अतिक्रान्तः कालः महोत्सवनिमित्तं महाराजाय समर्पणीयममूल्यमेतदंशुकम्)

दामोदरः—तर्ह्यावयोरप्यनुरूपं प्रदेह्यंशुकं सभाप्रवेशाय,

रजकः—(सामर्ष) ळे पुणो वि एळं मा भण, अणुरूवं फळं अणुहविस्ससि, (छाया—रे पुनरपि एवं मा भण, अनुरूपं फलमनुभविष्यसि)

दामोदरः—भवतु, भवतु, देहि तावत्,

रजकः—मुंच ळे मग्गं, (कृष्णं परिनुदति) (छाया—मुञ्च रे मार्गं)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(नीलाम्बरः—सस्मितं वस्त्रभारमधः पातयति)

रजकः——ळे, मं ण जाणासि, (चपोटिकां ददाति) छाया—रे मां न जानासि)

दामोदरः——जानामि त्वाम् । (मुष्ट्या वक्षसि प्रहरति)

(**रजकः**—गतप्राणः पतति) (उभौ—स्वानुगुणमंशुकमादायात्मानमलङ्कृत्य परिक्रामतः)

नीलाम्बरः——

क्रमेलकशेरुका खुरणसा नमज्जत्रुका
मलाविलचलद्रदा प्रसृतपार्श्वकोच्चावटुः ।
अरालकरभा चलत्पृथुलभुग्नगुल्फाञ्चला ।
पतद्द्रूहकरा नता चरति कास्विदेषा पथि ॥ ५ ॥

दामोदरः——पृच्छामस्तावदेनामपि । (परिक्रामति)

(ततः प्रविशति यथानिर्दिष्टा कुब्जा)

कुब्जा——तुरिअं गन्दव्वं किं करिस्सं ण प्पच्चळइ अंघी ।
(छाया—त्वरितं गन्तव्यं किं करिष्यामि, न प्रचलत्यङ्घ्रिः ।)
(दामोदरः——उपसृत्य हसति)

कुब्जा——वच्छ, कुदो हससि । (छाया—वत्स, कुतो हससि)

दामोदरः——मनोहराङ्गीति ।

कुब्जा——ण हि किं हं रमणिज्जा । (छाया—न हि किमहं रमणीया ?)

दामोदरः——उक्तं हि । त्वां ज्ञातुमिच्छामि ।

कुब्जा——(सस्मितं) किं एदं वि भणिदव्वं, इत्थिआ खु हं ।
(छाया—किमेतदपि भणितव्यं, स्त्री खल्वहम् ।)

दामोदरः——ज्ञातमिदानीम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीलाम्बरः—तव नामधेयम् ।

कुब्जा—मह सरीरं एव्व भणादि । (छाया—मम शरीरमेव भणति ।

दामोदरः—भवतु, नर्मज्ञासि, त्वरितगामिनी क्व प्रस्थिता ?

कुब्जा—किं तुमं एव्व तुरिअगमणो, पेक्खह्म । मए सह धावदु दाव भवं । (छाया—किं त्वमेव त्वरितगमनः ? पश्यामः । मया सह धावतु तावद्भवान् ।)

दामोदरः—(बद्धपरिकरः) प्रधावतु भवती ;

कुब्जा—(तुमं वि । (छाया—त्वमपि ।)

दामोदरः—भवतु । (सज्जस्तिष्ठति)

कुब्जा—(क्रमेलकवत्परिधाव्य परावृत्य) वंचओ सि (छाया वञ्चकोऽसि ।)

दामोदरः—(सस्मितं) नाहं समर्थः ।

नीलाम्बरः—अहं धावामि, प्रधावतु भवती । (सज्जस्तिष्ठति)

कुब्जा—मा खु मा खु । (छाया—मा खलु मा खलु ।)

दामोदरः—(उपसृत्य) क्व प्रस्थिता ?

कुब्जा—वट्टइ खु । (स्वोदरं परामृशति) (छाया—वर्तते खलु)

दामोदरः—न हि ते प्रियः ?

कुब्जा—वट्टइ, सो मह प्पिओ, हं उण तस्स अप्पिआ जादा । (छाया—वर्तते, स मम प्रियः । अहं पुनस्तस्याप्रिया जाता ।)

दामोदरः—कुतः ?

कुब्जा—हं अरमणिज्जा त्ति पलिच्चत्ता । (छाया—अहमरमणीयेति परित्यक्ता ।)

नीलाम्बरः—स तु सुन्दरो भवेत् ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुब्जा––अहइं सुणोदु––

बळिळो तुंदी खुज्जो

जळसिच्चंगालवण्णओ विग्गो ।

बहिलो मुण्डो खोडो

वट्टइ मह वळ्ळहो दूहे ॥ ६ ॥

(छाया–अथकिं शृणोतु––वलिरस्तुन्दी कुब्जो जलसिक्ता-ङ्गारवर्णको विग्रः । बधिरो मुण्डः खोडो वर्तते मम वल्लभो दूरे ।)

दामोदरः—दिष्ट्या सङ्घटनमिदम् ।

कुब्जा––देण पळिचत्ता उअळकए महाळाअस्स घुसिणकम्मं कुणन्ती वट्टामि, को तुमं ? (छाया–तेन परित्यक्ता उदरकृते महाराजस्य घुसृणकर्म कुर्वती वर्ते । कस्त्वम् ?

दामोदरः—कथं जानासि ?

कुब्जा––पुरिसोत्तमं जाणामि । (छाया–पुरुषोत्तमं जानामि ।)

दामोदरः—बालोऽहम् ।

कुब्जा—होदु, होदु, वामणो को ? (छाया–भवतु, भवतु, वामनः कः ?

दामोदरः—स तु पुरुषोत्तमः ।

कुब्जा—तुमं वि । (छाया–त्वमपि ।)

दामोदरः—तर्हि ममापि याञ्चाधिकारः ।

कुब्जा—हं इद्धिआ जण्णाहिआरो ण हि, किं जाचासि ? (छाया–अहं स्त्री, यज्ञाधिकारो न हि, किं याचसे ?

दामोदरः—त्वयि यदस्ति ।

कुब्जा—घुसिणं अत्थि (छाया–घुसृणमस्ति ।)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दामोदरः—देहि तदेव ।

कुब्जा—मं वि बळिं विअ पादाळं णेसि किं? (छाया—मामपि बलिमिव पातालं नयसि किम्?

दामोदरः—त्वामुद्धरामि ।

कुब्जा—ता गेह्न । (ददाति) (छाया—तर्हि गृहाण ।)

दामोदरः—(बलरामायार्पयित्वात्मानमलङ्कृत्य) कथमस्ति !

कुब्जा—कामजणओ विअ दिट्ठिजुअळेण णाळं तुमं दट्ठुं मं उद्धळ । (छाया—कामजनक इव, दृष्टियुगेलन नालं त्वां द्रष्टुं, मामुद्धर ।) (दामोदरः—तथा करोति ।)

कुब्जा—(संस्कृतमाश्रित्य)—

सौन्दर्यं सौकुमार्यञ्च लावण्यं प्रांशुतात्मनः ।
हन्त दिष्ट्या मया नाथ स्वप्नेष्येवं न चिन्तितम् ॥ ७ ॥

(सविभ्रमं) अस्मद्गृहमलङ्करोतु स्वामी, धन्या भवेयम् ।

दामोदरः—(सस्मितं) भवतु प्रकृतकार्यानन्तरम् ।

सुन्दरी—इतोऽपि प्रकृतकार्यं किम्?

दामोदरः—महाराजस्य धनुर्महोत्सवः ।

सुन्दरी—स तु वञ्चनाव्यापारैकतानः । जागरूकेण भवता भवितव्यम् ।

दामोदरः—स्यान्नाम । पश्यामः । गच्छतु भवती ।

सुन्दरी—मङ्गलं ते भूयात् । (सविभ्रमं निष्क्रान्ता)

दामोदरः—(नेपथ्याभिमुखमवलोक्य) आर्य, अयं मालाकारः, पश्यत्वार्यः—

पुष्पादानं भाजनाद्वृन्तसूत्र-
ग्रन्थ्याघानं कश्च शक्नोति वेत्तुम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शश्वत्पाणिर्नृत्यतीवास्य चित्रं
रम्यं माल्यं दृश्यते माययेव॥ ८ ॥

अस्मद्भक्ताग्रेसरोऽयं, आर्य, विनोदेन कञ्चित्कालमतिवाहयामः।

नीलाम्बरः—यथा रोचते भवते।

दामोदरः—अद्य वृद्धेभ्यभूमिकां परिगृह्य माल्यक्रीणनाय प्रविशत्वार्यः।

नीलाम्बरः—कथं भवान्?

दामोदरः—अहं तु प्रविशामि कसदूतभूमिकया (उभौ-तथाभूत्वा परिक्रामतः।)

(ततः प्रविशति यथानिर्दिष्टो मालाकारः।)

मालाकारः—इतस्तावत्।

प्रविश्य भार्या—आणवेदु (छाया—आज्ञापयतु।)

मालाकारः—अपि सज्जं?

भार्या—अहइं गोमएण सोहिदं क्खिदिदळं, णाअवळ्ळीए अळंकिदं अ (छाया—अथकिं गोमयेन शोधितं क्षितितलं नागवल्या अलङ्कृतञ्च।)

मालाकारः—दीपिकास्तम्भद्वयं पुनः?

भार्या—भद्दासणस्स पुळदो णिक्खित्तं हेअङ्गवीणेण पूळिदं अ।
(छाया—भद्रासनस्य पुरतो निक्षिप्तं हैयङ्गवीनेन पूरितञ्च।)

मालाकारः—गृहाण, अलङ्कुरु भद्रासनम्। (पुष्पमालास्समर्पयति।)

(भार्या—आदाय निष्क्रान्ता।)

मालाकारः—सन्निहितेव भगवदागमनवेळा, धन्यो भवेयम्।

धनी—(उपसृत्य) कियदस्य?

मालाकारः—अमूल्यमेतत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धनी—तर्हि, तूर्ष्णीं दीयते ?

मालाकारः—न हि, न हि,

धनी—दीयतां मूल्याय।

मालाकारः—अद्य नापि विक्रीयते।

धनी—कुतः ?

मालाकारः—आयाति भगवान्।

धनी—भगवान्कः ?

मालाकारः—वासुदेवः।

धनी—आयातु नाम।

मालाकारः—सर्वमिदं तस्मै।

धनी—सन्ति किल बहूनि माल्यानि।

मालाकारः—उक्तं हि सर्वमपीति।

धनी—दीयतामेकं, दास्यामि द्विगुणतरं मूल्यम्।

मालाकारः—(सस्मितं) पुरस्स्थापितेऽपि मेरौ न दास्यामि दलमेकमपि।

धनी—मयापि भगवते नीयते।

मालाकारः—(साञ्जलिबन्धं) गन्तुमर्हति भवान्।

कंसदूतः—(उपसृत्य) किमिदम् ?

मालाकारः—न किमपि।

दूतः—(सरोषं) न किमपि, राज्ञा तावद्भवदागमनं प्रतिपालनीयम्।

मालाकारः—राजा कः ?

दूतः—उन्मत्तस्संवृत्तोऽसि।

मालाकारः—(सास्मितं) तथैव भवतु।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दूतः—किन्तु खलु भवतु तथैव, दण्ड्योऽसि।

मालाकारः—पश्यामः को वेति।

दूतः—गच्छ रे माल्यमादाय प्रासादम्।

मालाकारः—अस्मद्गृहमेव प्रासादः।

दूतः—हन्त, भवद्गृहं प्रासादः?

मालाकारः—अथ किं वासुदेवस्येदम्।

दूतः—अङ्ग मुधा जहासि जीविकाम्।

मालाकारः—(सस्मितं) हुं तृणीकृतजीवितस्य मे किं तया?

दूतः—इमानि तावत्कस्मै?

मालाकारः—भगवते वासुदेवाय।

दूतः—हन्त वध्याय सत्कारः।

मालाकारः—(सबाष्पगद्गदं) शान्तंपापं, शान्तंपापम्।

(प्रविश्य) पुत्रः—तात, तौ नायातौ, शून्येन रथेनाक्रूरः प्रविष्टः सौधम्।

मालाकारः—(सावेगं) पाप, अस्मन्मनोरथेनेति ब्रूहि (सनिर्वेदं) अपि सत्यं सम्यगवलोकितम्।

पुत्रः—किमलीकं कथयेयम्?

मालाकारः—न पृष्टः किमक्रूरः?

पुत्रः—न हि।

मालाकारः—(दीर्घं निश्वस्य) हुं न हि, न हि।

दूतः—स तु महाराजभीत्या तत्रैव भवेत्।

मालाकारः—कथं, महाराजाद्भीतिः स तु भयापहो हि।

दूतः—उत्तिष्ठ, आयाहि, समर्पय राज्ञे।

मालाकारः—हन्त महाराजाद्भीतिः नाथ, आश्रितानामभयाय खलु भवदवतारः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दूतः—किमु न श्रुतम् ।

मालाकारः—तात किमुक्तम् ?

दूतः—उत्तिष्ठ आयाहि समर्पय राज्ञे ।

मालाकारः—मास्तु, मास्तु, भगवते सङ्कल्पितम् ।

दूतः—अरे स तु दूरे ।

मालाकारः—भक्त्या मनसैव समर्पयामि अङ्गीकरोति भगवान् अलङ्कारप्रियो हि ।

धनी—स तु नागतः देहि माल्यमेकम् ।

मालाकारः—कथं नागतः ? (सबाष्पगद्गदं) भगवन् भक्तवत्सलो हि भवान् । क्व लीनमिदानीं तद्वात्सल्यम् ।

गजेन्द्रो ग्राहार्तः कमलमपचित्योद्धृतकरः
नितान्तं तान्तात्मा सरसि निजयत्नं शिथिलयन् ।
गृहाणेदं स्वामिन्निति चिरमरोदीत्करुणया
तदादातुं दूरान्न किमु गरुडेन त्वमगमः ॥ ९ ॥

अहमपि भवग्राहार्तः चिराद्रोदिमि, आयाहि, माल्यमिदमङ्गीकुरु, (सनिर्वेदं) हुं, कथं पापीयांसमुपगच्छति ? (सबाष्पं) नूनं नूनं, पापीयानहं, किन्तु खलु पापापहो हि भगवान् आयाति, अनुगृह्णाति मां, (सोन्मादहासं) एह्येहि, कथमौदास्यं ? नोचितमिदम्, नाथ क्व गतं कारुण्यम् ? अहमेव खलु पात्रं तव कारुण्यस्य । (समन्तादवलोक्य सवैलक्ष्यं) किन्नु खलु न हि दृश्यते ?

(ससम्भ्रमं प्रविश्य) **भार्या**—अज्ज तुवर तुवर (छाया-आर्य त्वरस्व त्वरस्व)

मालाकारः—कुतः ?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भार्या—पुप्फासणे वासुदेवो बलदेवोऽवि (छाया-पुष्पासने वासुदेवो बलदेवोऽपि।)

मालाकारः—कथं, वासुदेवः? अस्मत्स्वामी वासुदेवः, बलभद्रोऽपि भगवदग्रजः, हन्त, भद्रमस्तु भद्रमस्तु। (सहसोत्प्लुत्य परिक्रामति।)

(ततः प्रविशतः पुष्पासनोपविष्टौ नीलाम्बरपीताम्बरौ।)

पीताम्बरः—(समन्दस्मितं) आर्य कथं वर्तते मालाकारः।

नीलाम्बरः—किं कथयेयम्,

मालाकारः—(संरभसमुपसृत्य) देवदेव, (प्रणम्योत्थाय साञ्जलिबन्धं)

भगवानयं हि वसुदेवसम्भवो
भवसागरान्तरसकृज्जनेर्मम।
भवनं कुपैकवसतिस्समेयिवा-
नहमेव हन्त सुकृती शरीरिणाम् ॥ ९ ॥

(नृत्यति)

भार्या—समप्पेदु अज्जो माळं। (छाया–समर्पयत्वार्यो मालाम्।)

मालाकारः—इदमहं समर्पयामि। (मालामादाय) भगवन् भक्तवत्सल, अवाप्तसमस्तकामो हि भवान्।

दामोदरः—अमूल्यं किल माल्यमिदं, देहि देहि तावत्।

मालाकारः—(उभावपि माल्यैरलङ्कृत्य) हन्त भोः, मया समर्पितमप्यङ्गीकृतं भगवता। धन्योऽस्मि। धन्योऽस्मि (सप्रदक्षिणं प्रणम्योत्थाय) वत्स, विस्तारय लोचने, सहधर्मचारिणि, विस्तारय लोचने,—

अनेकपरिवत्सरं नियमतस्तपश्चर्यया
सुधीरपि विलोकयेन्नवपयोदमेनं न वा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृपामृतभरात्स्वयं सविधमागतं सादरं
विलोकय विलोकयामृतरसप्रदानोन्मुखम् ॥ १० ॥

(सभक्ति निर्वर्ण्य) हन्त भोः, शेषशायी चतुर्भुजो भगवान्पुण्डरीकाक्षः,। नमोस्तु ते हन्त मास्तु अस्माकं दृष्टिदोषः। भद्रमस्तु ते। (साञ्जलिबन्धं तिष्ठति।)

दामोदरः—तात, सन्तुष्टोस्मि ते भक्त्या।

मालाकारः—कृतकृत्योस्मि।

दामोदरः—दातुमिच्छामि, यदभिमतं ते।

मालाकारः—भगवन्, अखिलमपि भवदीयं खलु।

दामोदरः—अहो, ते निस्पृहता। दत्तमस्मत्पदम्।

मालाकारः—(सहर्षगद्गदं) कथं मुक्तोऽहम्?

दामोदरः—न केवलं भवान् भवद्वंश्या अपि।

मालाकारः—कथं तेऽपि मुक्ताः? (पुत्रमालिङ्ग्य) वत्स मुक्तोऽसि, प्रिये मुक्तासि, (सोन्मादहासं) हन्त, सर्वे मुक्ताः (निजोद्गमनीयमुत्पात्य नृत्यति।)

दामोदरः—किं ते भूयः प्रियमुपहरामि?

मालाकारः—नाथ, भवत्पादारविन्ददास्यादपि किमस्ति प्रियमन्यत्? तथापीदमस्तु।

(भरतवाक्यं)

भूपालाः परिपालयन्तु भुवनं न्याय्येन सम्यक्पथा
स्याद्गोब्राह्मणमण्डलाय कुशलं लोकोऽस्तु नित्यं सुखी।
कासारा रसपूरिता विटपिनः पुष्पैः फलैस्सम्भृताः
सस्याढ्या धरणिश्च सन्तु समये वर्षन्तु धाराधराः ॥ ११ ॥

(निष्क्रान्तास्सर्वे)

(द्वितीयोऽङ्कः)

इति श्रीबालधन्वि जग्गूवकुलभूषण कविविरचितं अमूल्यमाल्यं सम्पूर्णम्।

शुभमस्तु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धीशालिस्तुतमरविन्दपत्रनेत्रं
श्रीसीतारमणमुपाश्रये नितान्तम् ॥
नतभूसुरकांक्षितदानदयं
हृतदुर्मदानववीरचयम् ।
क्षितिजेशपदांबुजपुष्पलिहं
सततं प्रणमामि हरीशमहम् ॥
यस्साहित्यनिधिः कवित्वलतिकारम्यालवालः परं
छन्दस्तत्वविचारको ध्वनिरसालङ्कारख्नाम्बुधिः ।
तर्कव्याकरणादितन्त्रजनिभूश्श्रीमद्धनाद्र्यन्वय
क्षीराब्ध्यम्बुजवासिनीसहजनिस्तं धीरचूडामणिम् ॥
वन्दे मुकुन्दपादाब्जवम्भरायितमानसम् ।
वज्रकण्ठाभिधापूर्वं तातयाचार्यसद्गुरुम् ॥
कवितार्किकद्विरदसिंहविक्रमम्
भववार्धिपोतहरिभक्तिनिस्समम् ।
निगमागमान्तनिलयं बुधाग्रिमम्
प्रणमाम्यहोबिलगुरुं गुरूत्तमम् ॥
घनशैलकुलीनश्रीनरसिंहकविः कृतिम् ।
हनुमद्विजयाभिख्यां तनुते तत्कृपाबलात् ॥

उपसंहारः—

पिबन्सुधां दाशरथिर्गुरोर्मुखा
द्विनिर्गतां वायुजनेर्जयाभिधाम् ।
ससम्मदक्षीरकणैर्निषेचय
न्वसुन्धरामक्षिभरैर्गुरुं जगौ ॥
भगवन्नृसिंह यदशेषरञ्जकं
पवमानसूनुचरितं त्वयाधुना ।
सरसोक्तिभिर्निगदितं तदक्षयं
चरतु क्षितौ बुधमुखाब्जसन्ततौ ॥
इत्युदीर्य रघुवंशमण्डनः
सत्कृपारसधुनीपतिस्तदा ।
वायुजाय घनसम्मदाददा
न्नित्यतां स्वपदकञ्जभक्तताम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति श्रीचण्डभानुकुलमण्डनराकाचन्द्ररामचन्द्रपदपयोजमदवदिन्दिन्दि-रसमीरकुमारवरकरुला(णा)रससंपर्कनि(र)र्गळत्सहृदयहृदयानन्दबृन्द — मन्दारकवितासुधामरापगासारेण श्रीगिरिघनशैलकुलजलधीजल-जलयासोदरे ॥

No. 96 (765)

उद्धतवृकोदरप्रेक्षणकम्

Udhatbavrkodaraprekshanakam

Author—Bhagvathkrishna Sharma
Substance—Palm-leaf.
Size—$15\frac{1}{2} \times 1\frac{1}{4}$ inches.
Character—Andhra.
Folios—37.
Lines on a page—5.
Letters in a line—40.
Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

॥ शुभमस्तु ॥

दोधूयन्तां धुरन्तां (दुरन्ता) नश्चिन्ता आकण्ठदान्तिना ।
केन चिद्घोरसंसारवाराशिबडवाग्निना ॥ १ ॥

किंच—

उद्भटकटुविषकबळनपटुकटितटघटितकरटकृत्तपटं ।
जटिलं विटिलदृगाद्यं कुटिलनिशाविटललामधाम भजे ॥ २ ॥

॥ नान्द्यन्ते सूत्रधारः ॥

(सर्वतोऽवलोक्य) । अलमलमधिकप्रसङ्गेनेति किंचित्परिक्रम्य ।
दुर्धररिपुहृदयान्तास्तिमिरीतिरस्कारनखमुखमयूखः ।
जयति श्रीमान्भीमः प्रणतप्रह्लादकस्स नरसिंहः ॥ ३ ॥
इति पुष्पाञ्जलिं विकीर्य, सादरमञ्जलिं बद्ध्वा । भो भोस्सभा-स्ताराः ।
श्री कृष्णो राजेन्द्रस्सजयति यत्साम्यवर्णनपरस्य ।
शरणमनन्वयवाणीमौनं वा धीमतां वरस्यापि ॥ ४ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किंच--

अकळङ्कैः प्रसादाद्यैस्सकलै राजतां गुणैः ।
दधानोऽपि परं दाने यस्सहस्रकरायते ॥ ५ ॥
यं कृष्णमनरिदरयुतमकुवेरं राजराजमपि कवयः ।
प्रद्युम्नमशिववैरिणामीश्वरमविषमदृशं च शंसन्ति ॥ ६ ॥

उपसंहारः--

यो भूयोऽम्बरकेशपाशकलनात्पाञ्चालजातारणे-
रासीद्वैरहुताशनोऽतिमहिमाकौरव्यहव्यैरलं ।
तं सन्तर्पयतो यथाविधि मया दत्ता जयश्रीस्तव
छायेवानुगतास्त्वियं मदनुजा जिष्णोस्सुभद्रा यथा ॥ १३० ॥

भीमः--(सस्मितं) देव का नाम न्यूनता भवदाश्रयाणां कल्याणोत्सवस्य ।

कृष्णः--(सोल्लासं) ब्रूहि भूयस्ते किं प्रियमुपहरामि ।

भीमः—(सानन्दं) देव किमस्ति प्रार्थनीयं भगवत्कृपाकटाक्षवीक्षाविलासपात्राणाम् ॥

प्रतिज्ञा दुस्तरास्तीर्णाः कृपातस्तव केशव ।
जयश्रीरपि राज्यश्रीर्लब्धा कीर्तिश्च दुर्लभा ॥ १३१ ॥

तथापीदमस्तु भरतवाक्यं—

धमात्मैषधरेशस्सन्तोषितसज्जनश्चिरं जयतु ।
समये वर्षत्विन्द्रस्साध्वी गुरुकरणयास्तु मे बुद्धिः ॥

(इति सर्वे निष्क्रान्ताः)

॥ श्रीरस्तु नस्सन्ततम् ॥

———

प्रतिपाद्यविषयः—

अत्र सूत्रधारपारिपार्श्वकयोः, सञ्जयविरोचनकयोश्च संवादः। भीमकर्णादीनां युद्धवर्णनं। भीमदुश्शासनयोर्युद्धर्णनं। दुश्शासनवधः इत्यादीन्युपपादितानि ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 97 (301)

कामकलाविलासभाणः

Kamakalavilasabana

Author—Venkamatya
Substance—Palm-leaf.
Size—$17 \times 1\frac{1}{4}$ inches.
Character—Andhra.
Folios--10.
Lines on a page—8.
Letters in a line—88.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—
Correct.
Complete or incomplete—
Complete.

उपक्रमः—

॥ शुभमस्तु ॥

॥ श्रीसैन्धवकन्धराय नमः ॥

विष्वक्सेनाय नमः

उपक्रमः—

जयन्ति जगदानन्दमन्दारोदयहेतवः ।
चिदानन्दगुरोरङ्घ्रिनखेन्दुकिरणाङ्कुराः ॥
केळीं कामपि कौतुकाद्विरचयन्नाभीर . . . . .
. . . . कौतुकम् ।
तद्याज्ञाकपटेन तामनुनयन्नाश्लेषविश्राणना-
त्कृष्णस्तत्कृतकं तु केळिमुदितः पुष्णातु वः कौतुकम् ॥

अपि च—

गण्डक्षोणिगळन्मदाम्बुलहरीवल्गान्मिळिन्दाङ्गना
गीताकर्णनसंभ्रमोदितमनोत्कण्ठप्रियालिङ्गितः ।
प्रत्यूहानिव वारयन् . . . .
. . . . कल्याणं वितनोतु वः प्रतिकलं कण्ठोपरिष्टाद्गजः ॥

अपि च—

वामाङ्गस्थवधूविलासविवशं कृत्वा महेशं चिरं
सामन्तं शशिनं च तत्परिसरे क्षिप्त्वा तदुद्दीपकम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दोर्लीलालवमुद्रितत्रिजगतीधैर्यप्रवोधोद्धतिः ।
विश्वग्वन्दितशासनो विजयते विश्वैकवीरो महान् ॥

नान्द्यन्ते

सूत्रधारः—सामाजिकानवलोक्य—

पर्यायव्यपवृत्तमौक्तिकसरं प्रस्यन्दिघर्माम्बुकं
दृश्यादृश्यनखक्षतं दृढपरीरम्भोत्कटत्कञ्चुकं ।
तन्वङ्गयास्तपनीयकुम्भसुषुमाप्रस्पर्धिभङ्गयारुचा-
मुद्वृत्तं स्तनयुग्ममस्तु भवता....वचश्श्रेयसे ॥

अपि च—

स्फायन्मांसलभावमञ्जुळतया सम्मोहिवक्षोरुहं
स्निग्धापाङ्गसखीकृतास्मितरुचासम्मुग्धवक्त्राम्बुजम् ।
प्रत्यङ्गं प्रविसारिचञ्चलतरच्छायाभिरालक्षितं
कुर्याद्यव्वतयव्वनं(द्यौवतयौवनं) च कुशलामोदप्रसौख्यानिव ॥
हारावळीनटनरङ्गकुचस्थलीनां
स्मेराननप्रवलितश्रमबिन्दुकानाम् ।
पारावतीसदृशहुंकृतिचारु तद्वो
वीरायितं मृगदृशां वितरत्वभीष्टम् ॥

इति पुष्पाञ्जलिं विकीर्य । मारिष इतस्तावत् ।

(प्रविश्य)

पारिपार्श्वकः—कथमिति ।

उपसंहारः—

अहो ! समागत एव नूपुरकः ।

नूपुरकः—किं ब्रवीमि । सखे, पल्लवशेखर लब्धचंपकलतस्त्वं नियतिवशादिति ।

सहर्षपुलकं कथमित्र ।

नू—किं यदद्य चंपकलता महीशूरनगरं प्रतिस्थातुकामाऽनिजवर्षीय सश्चित्रांगदस्य कुमारोदयोत्सवमाकर्ण्य पित्रा चित्रवर्मणा पुनराकारिता । तदनु मत्प्रणयसर्वस्वभुवा लवङ्गिकया साकं रङ्गपुरीं प्रतिनिवृत्ता । श्रुतमिदं मत्प्रेयस्या लवङ्गिकया सख्या पत्रलेखया मया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथैव पत्रलेखया भवदुत्कंठितवृत्तान्तस्सर्वोऽपि चंपकलतां प्रति प्रेषितः। सा पुनर्भवत्सकाशं प्रेषितवती वाचकमितीति। (हस्ते पत्रं ददाति) सहर्षविस्मयम्--

विटशेखरो विधिवशाद्विघ्नितमहीशूरनगरनिर्गमनाम्।
चंद्रोदये पुनर्मां नन्दयतु स्वैरमेतदुद्याने॥

(इति पत्रं वाचयन्) (नूपुरकालिङ्गनमभिनीय)

कान्तायत्नानाकलय्याकलय्य प्रेम्णा सार्थप्रार्थनां तां पुरस्तात्।
श्लाघायोग्यं कुर्वतो मामिदानीं भूयः किं वा कल्पभूमिः प्रियं ते॥

नूपुरक किं ब्रवीषि।

सखे पल्लवशेखर किं ममापि कल्पनीयं प्रियं भवता तदितः परं निष्कुटवनप्रवेशादन्यदिति। (निष्कुटवनप्रवेशं नाटयित्वा सानन्दं।

आयातोऽभिमुखं पुरः पुरहरो सस्फारवात्सल्यभूः
कारुण्याद्गिरिराजराजदुहितुः दूरेतरो यः कृतः।
शब्दा सा सविधेऽपि चंपकलतालावण्यसंपन्निधिः
सर्वं संप्रति साधु साधु फलितं साम्राज्यमानङ्गकम्॥

तथापीदमस्तु भरतवाक्यम्।

नन्दत्वद्य सरस्वती रसवती नन्दन्तु विद्वज्जनाः
दीव्यंत्वद्य समन्ततः क्षितिसुरैः देवास्समभ्यर्चिताः।
राजानस्सुखिनो भवन्तु सचिवैस्संरक्षयन्तो महीं
आकल्पं रसिकानियं भुवि कृतिश्चास्वादिका वर्धताम्॥

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते॥

इतिकामकलाविलासभाणस्संपूर्णः

प्रतिपाद्यविषयः---

अत्र आदौ सूत्रधारप्रवेशः, ग्रन्थकर्तुः प्राशस्त्यवर्णनम्। वसन्तर्तुवर्णनम्। प्रभातवर्णनम्। पल्लवशेखरनूपुरकयोस्संलापः। कामगुप्तपत्न्याः वाण्याः सौन्दर्यवर्णनम्। पल्लवशेखरकमलाक्षयोस्संलापः। कामपालभार्यासौन्दर्यवर्णनम्। पल्लवशेखरनवमञ्जर्योस्संलापः। पल्लवशेखरकलवाण्योस्संलापः। मञ्जुवाणीसौन्दर्यवर्णनम्। चित्ररेखा, मणिमञ्जरी काञ्चनलता, कर्पूरमञ्जरीणां सौन्दर्यवर्णनम्। उद्यानवनवर्णनम्। चंपकलतापल्लवशेखरयोर्मेळनम् इत्यादीनि वर्णितानि॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

No. 98 (301).

कुक्षिंभरभैक्षवप्रहसनम्

Kukshimbharabykshavaprahasanam

Author—Venkamatya.
Substance—Palm-leaf.
Size—17×1¼ inches.
Character—Andhra.
Folios—11.
Lines on a page—8.
Letters in a line—88.

Age of MS—Old.
Condition of MS—Good.
Correct or incorrect—Correct.
Complete or incomplete—Complete.

उपक्रमः—

निर्विघ्नमस्तु । श्रीगणेशशारदागुरुभ्यो नमः ।

स्वानन्दैकपरस्तपस्यति चिरं नूनं सुभद्राप्तये
भावोऽबोधि मया तदर्हणपरं योगी विरागी तव ।
पायादित्थमसत्यदूरवचनैः प्रत्याययन्नग्रजं
मायामौनिनमर्जुनं प्रहसयन्मायामनोवल्लभः ॥

अपि च

जा(त) तः श्रीमाति जातवेदसि हरक्रीडादिदृक्षाजुषी (षि)
प्रोतश्शातमखेव पुष्यदमुनेर्योषारिरंसापुषि ।
भावश्चित्रशिखण्डिजेन शशभृन्नीताङ्गनाकामिना
ख्यातस्सोऽस्तु विलासिनामविरतोल्लासाय हास्यो रसः ॥

नान्द्यन्ते सूत्रधारः । अंजलिं बद्ध्वा ।

कृतस्वाचारसंरोधैः कृतं कृतयुगादिभिः ।
कल्या . . . . तननिषिद्धाय कलये कलयेऽजलिम् ॥

इति पुष्पांजलिं विकीर्य । पुरोऽवलोक्य । सहर्षम् ।

प्रसिद्धोऽयं पंथाः प्रथममुनिभृग्वादिमुनिभिः
श्रुतिस्मृत्याम्नायप्रवचनचणैरात्मानिपुणैः ।
प्रतिष्वस्तं प्रायस्स्मरति न जनो यस्य सविधं
समाजस्सोभून्मे स्वकृतसुकृतैरक्षिविषयः ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सज्जीकृता च रङ्गसामग्री। अयं च निरवधिकमदनप्रतापसमयः प्रसूनसमयः। तथा हि—

निजसंफुल्लपुष्पश्रीरक्तीकृतनवांबरा।
किं वा न कुरुते कामं किंशुकावळिरार्तवम्॥

उपसंहारः—

वक्रदन्तः—(भल्लूकं प्रत्यपवार्य) पात्रविशेषार्पणेन सफलता जातेति वक्तव्यम्।

कुक्षिंभरः—अयि सुन्दरि, परिगृह्यतामासनम्। (इति हस्तेनाकर्षति)

कामकलिका—(श्रृंगारलज्जां निरूप्य)। तंध भवतो एंव णिउणा याणवळिंगहंस। (छाया–तत्र भवन्त एव निपुणा आसनपरिग्रहस्य। (इति समीपे उपविशति।

कुक्षिंभरः—(सहर्षं स्पर्शसुखमभिनीय) अये, वक्रदन्त,

त्वयैव प्रियशिष्येण स्वयमानीय वल्लभाम्।
परितोषयता नूनं प्रथिता गुरुदक्षिणा॥

वक्रदन्तः—सर्वमपि भगवत्प्रसादेनैव।

कुक्षिंभरः—कृतोपकारिणस्तव मठाधिपत्यमेव वितीर्णम्।

इतरौ—(विहस्य) युज्यतै(तए)वैतत्।

कुक्षिंभरः—किं ते भूयः प्रियमुपहरामि। तथापीदमस्तु भरतवाक्यम्।

सरसानां सभा भूयात्साहितीरसबन्धुरा।
प्रभुर्भवतु लोकस्य प्रार्थनाकल्पकल्पकः॥

यस्मिन्नेव वसत्यखण्डितरमासाम्राज्यधौरंधरी
यं प्राप्याखिलशास्त्रभूस्समभवत्पातिव्रतीं साहितीम्।
यस्सर्वज्ञशिरोमणित्वबिरुदश्श्रीवेंकयार्याभिदः (धः)
तस्यैतस्य जयात्विदं प्रहसनश्रीरूपकं रूपकम्॥

इति कुक्षिंभरभैक्षवाख्यप्रहसनं संपूर्णम्

प्रतिपाद्यविषयः—

अत्र आदौ सूत्रधारनटीसंवादः। ग्रन्थकर्तुः प्रशंसा। बुद्धायतनं प्रति प्रस्थितेन कुक्षिंभरेण कामकलिकावलोकनम्। तेन मदनव्यथानुभवः। वक्रदन्तपिचण्डिलयोः, भल्लूकजम्बुकयोः, जंगमदासयोः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवंद्वितीयो मकारो मत्स्यो नाम जलतत्त्वम् । तदाश्रयस्कुलार्णवतन्त्रमनुशास्ति—'मनसा चेन्द्रि—

१. यदनुशास्ति स्पष्टं त्रिपुरोपनिषत् 'परिस्रुतं झषमाजं पलं च भक्तानि योनिः सुपरिष्कृताश्च । निवेदयन् देवतायै महत्यै स्वात्मीकृते सुकृते सिद्धिमेति' इति ॥

२. उपबृंहणानुरोधेनैव वेदार्थोऽवगन्तव्यो न स्वमनीषिकयेति । येन एवमाभाणकः 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद् वेदो मामयं प्रतरेदिति' । इति ॥

कतमं पुनः पुराणं कतमो वेतिहासः इमामुपनिषदमुपबृंहयति ? कुलार्णवादितन्त्रमिति ब्रूमः । नन्वेवं तर्हि नाभिलषितार्थसिद्धिः तन्त्राणामितिहासपुराणप्रथा यतो नास्तीति 'तत्र वदामोऽभिलषितार्थसिद्धिरेवेति' वेदार्थोपबृंहकमात्रस्य ग्राह्यतायां तद्वचनतात्पर्यात् ; कुलार्णवादीनां च उपबृंहकत्वात् ॥

ननु तन्त्राणां वैदिकैरग्राह्यतां मीमांसकसंप्रदायादवगच्छामः । सत्यं, शिष्टाकोपाधिकरणन्यायेन वेदविरुद्धांश एव अग्राह्यतायाः पर्यवसानात् ॥

कथमन्यथा वैदिकमूर्धन्याः श्रीमच्छङ्करभगवत्पादादिपरमाचार्याः नैकतन्त्राण्यनुरुन्धानाः प्रपञ्चसारादिग्रन्थान् अरचयिष्यन्, यदीमनि तन्त्राणि सर्वात्मना अग्राह्याण्येवाभविष्यन ? अस्तोष्यंश्च सर्वामेव तन्त्रमर्यादामनुरुंधानाः श्रीमत्त्रिपुरसुन्दरीमानसिकपूजास्तोत्र, देवीचतुष्षष्ट्युपचारपूजास्तोत्रादिभिः श्रीमत्सुन्दरीम् ? ययोरन्ते एवमाचक्षते आचार्यवर्याः :—

'क्वाहं मन्दमतिः क्वचेदमखिलैरेकान्तभक्तैस्स्तुतं
ध्यातं देवि तथापि ते स्वमनसा श्रीपादुकापूजनम् ।
कादाचित्कमदीयचिन्तनविधौ संतुष्टया शर्मदं
स्तोत्रं देवतया तया प्रकटितं मन्ये मदीयानने ॥
नित्यार्चनमिदं चित्ते भाव्यमानं मया सदा । निबद्धं विविधैः पद्यैः
अनुगृह्णातु सुन्दरी' इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'पूजामिमां पठेद्यस्तु पूजां कर्तुमनीश्वरः। पूजाफलमवाप्नोति वाञ्छितार्थांश्च विन्दति ॥

प्रत्यहं भक्तिसंयुक्तो यः पूजनमिदं पठेत्। वाग्वदिन्याः प्रसादेन वत्सरात् सकविर्भवेत्' इति। कथंवा अवदिष्यन् स्तोत्रमध्ये—

'मन्त्रान् वैदिकतान्त्रिकान् परिपठन्' इति स्पष्टतन्त्रग्रहणेन? 'ततो नात्राप्रामाण्यगन्धमप्याघ्रातुमीश्महे इति सिद्धम्' कीदृक् पुनस्तत्त्वमिहतन्त्राण्यनुशासति? तदनुक्रमिष्यामः—मनसाचेन्द्रियगणं संयम्यात्मनि योजयेत्। मत्स्याशी स भवेद्देवि शेषाः स्युः प्राणिहिंसकाः" इति एवं तन्त्रतत्त्वप्रकाशिकाप्यनुशास्ति—"अहंकारो दर्पोमदपिशुनतामत्सरद्विषः? षडेनान् मीनान् विषयहरजालेन विधृतान्। पचन् सद्विद्याग्नौ नियमितकृतिर्धीवरकृती। सदा खादेत् सर्वान् न च जलचराणां तु पिशितम्" इति। एवं तृतीयो मकारो मांसं नाम पृथिवीतत्त्वं। तदनुशिष्टः कुलार्णवतन्त्र तंत्रतत्त्वप्रकाशिके—"पुण्यापुण्यपशू हत्वा ज्ञानखड्गेन तत्त्ववित्। परे लयं नयेच्चित्तं पलाशी स निगद्यत" इति, "कामक्रोधसुलोभमोहपशुकान् छित्वा विवेकासिना मांसं निर्विषयं परात्मसुखदं भुंजीत तेषां बुधः" इति, "कामक्रोधौ पशू तुल्यौ बलिं दत्वा जपं चरेत्" इति च। एवं चतुर्थो मकारो मुद्रा नाम वायुतत्त्वं। तदनुशास्ति तन्त्रतत्त्वप्रकाशिका—"आशातृष्णाजुगुप्साभयविषयघृणामानलज्जाप्रकोपाः, ब्रह्माग्नावष्टमुद्राः परसुकृतिजनः पच्यमानाः समन्तात्। नित्यं संभावयेत्तानवहितमनसा दिव्यभावानुरागी, योऽसौ ब्रह्माण्डभाण्डे पशुहतिविमुखो रुद्रतुल्यो महात्मा॥" इति। एवं पंचमो मकारो मैथुनं नामाकाशतत्त्वं। तदिदमनुशिष्टःकुलार्णवतंत्र, तन्त्रतत्त्वप्रकाशिके—"परा(र)शक्त्यात्ममिथुनसंयोगानन्दनिर्भरः। य (दा) आस्ते मैथुनं तत्स्यादितरे स्त्रीनिषेवकाः" इति। "या नाडी सूक्ष्मरूपा परमपदगता सेवनीया सुषुम्ना, सा कान्तालिङ्गनार्हा न मनुजरमणी सुन्दरी वारयोषित्। कुर्याच्चन्द्रार्कयोगे युगपवनगते मैथुनं नैव योनौ, योगीन्द्रो विश्ववंद्यः सुखमयभवने तां परिष्वज्य नित्यं' इति॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नन्वशक्यानुष्ठानेयं देशना यत् द्वादशधामकं ध्यानमिति तन्न, शक्यानुष्ठानैवेति ब्रूमः, "भिन्नरुचिर्हि लोकः" इतीन्दुमतीपरिणय-प्रसंगे कविराडनुशास्ति, "विभिन्नरूपाः खलु चित्तवृत्तय" इति द्रौपदी-वचनमुखेन च भारविः। इहापि लोपामुद्रादयः तत्तद्विद्योपासकाः असाधारणा निर्दिष्टाः। नचैतेऽसिद्धसिद्धय एवेत्याख्यातुं प्रभवामो, नास्त्यत्र प्रमाणं यत इति। अस्तित्वेकविद्ययापि सिद्धिगमकं प्रमाणं पारमर्षं वचनं "सर्वचैतन्यरूपां तामाद्यां विद्यामधीमहि। सिद्धिः या नः प्रचोदयात्" इति। नचैवं शंकनीयं, यन्नेह त्रैपुरीया आद्या विद्या प्रत्यभिज्ञायते, येनैकैकस्या अपि विद्यायाः सिद्धिः साध्या स्यादिति, यत्कारणं "तामाद्यां विद्यां" इति उपस्थितार्थपरामर्शकं सार्वनामिकं तच्छब्दं द्वैपायनो महर्षिः प्रयुंक्ते इति। नचाज्ञाताया एवं जातीय-विद्यायाः प्रकृतोपनिषदमतीत्यान्यत् गमकं संभावयितुं शक्यते, अतोऽवश्यं "तां" उपनिषदोपस्थापितां इत्येवं बोधयितुमेवैवं प्रायुङ्क्त महर्षिरिति सिद्धम्॥

नन्वथापि आद्या विद्या सिद्धिसाधनी सिध्यति नान्या एका-दशविद्याः प्रत्येकं "यावदुक्तं वा कर्मणः श्रुतिमूलत्वात्" इति न्यायात् इति चेन्न; यथैष महर्षिराद्यविद्योपासकोऽवगतः एवमेवान्ये एकादशविद्यानां पृथक् पृथक् उपासका अवगम्यन्ते, तद्यद्येषा समु-च्चित्य सर्वविद्योपासनमेवोपनिषत् विधित्सेत् विभिन्नोपासकबोधकपदयो-जनमनर्थकं स्यात्। ततश्च "तत्सामान्यादितरेषु तथात्व"मिति न्यायात् द्वादशविद्या अपि फलजनिका इत्यवश्यमास्थेयम्। अतिगंभीर-हृदयस्य तु महाकवेः ईदृशाक्षेपपरिहारः "जगतः पितरौ पार्वती-परमेश्वरौ वागर्थौ संपृक्ताविव वागर्थकलामयप्रभाकरविद्यादिरूपसंपृक्त-विद्योपास्याविव वन्दे वागर्थप्रतिपत्तये। अर्थात् असंपृक्तशुद्धविद्यारूपौ श्रीमद्द्वैपायनाभिमताद्यविद्यारूपौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे" इति सूत्रस्थपदयोजनविशेषेण सिध्यति। अत्र मिश्रविद्याः दृष्टान्तीकृताः उपमेया शुद्धविद्या। "उपमेयात् शतगुणमुपमान"मिति आलङ्कारिक-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समयः । ततश्च सुतरां मिश्रविद्यानां फलजनकत्वं व्यंजितं महाकविना ॥

ननु भो एवं तर्हि समष्टिव्यष्टिसंबंधिजाग्रत्स्वप्नसुषुप्त्यारोपाधिकरणचैतन्यरूपायाः तदपवादाधिकरणरूपायाश्च सुन्दर्याः बोधनाय द्वादशानां धाम्नां कीर्तनं व्यर्थं, तादृग्धामकीर्तनेन हि " अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते " इति न्यायेन शुद्धावगतिः अध्यारोपेण-अपवादेन च साधनीयेत्यवगम्यते, ततश्च तयोः समुच्चित्यानुष्ठानं प्राप्नोति, सत्येवं नवोपासनाः अध्यारोपपूर्विकाः तिस्रश्चापवादपूर्विकाः कथं विकल्पेन सिद्धिफलजनिकाः साध्यन्ते इति चेत् परिहृतमिदं द्वैपायनेन " सर्वचैतन्यरूपां " इति निर्दिशता ॥

अयमभिसंधिः—सर्वस्मिन् नवविधारोपे त्रिविधापवादे च यत् चैतन्यं अधिकरणीभूतं तद्रूपामाद्यविद्यां इति विवरणेन आरोप्याणामपोह्यानां चोपलक्षणतया सर्वत्राधिष्ठानचैतन्यस्यैव सुन्दरीरूपस्य ध्येयत्वेन ध्यानजन्यपटुतमसंस्कारसहिताखण्डसाक्षात्काररूपचरमवृत्तेः संभवात् तथा च अविद्यातत्कार्यरूपाणां अखिलानां चैतन्यावरकाणां निवृत्तेः सच्चिदानन्दरूपात्मस्वरूपात्मावस्थारूपसिद्धिः द्वादशविद्यास्वपि समानेति । तदेवं द्वैपायनमहर्षेर्हृदयमवगच्छन् महाकविः संपृक्तविद्यानां उपमानतया शुद्धविद्यायाश्चोपमेयतया फलजनकत्वमाहेति सर्वं समीचीनम् ॥

ननु हसकहलह्रीमिति लोपामुद्राविद्या, हसकहलह्रीति क्रोधभट्टारकविद्या च न संपृक्तरूपे इति नोपमाने तयोः संग्रहः सिध्यति ततश्च ते न कविदृष्ट्या सिद्धिसाधन्यौ प्राप्नुतः इति चेत्, न प्राप्नुत इत्येव ब्रूमः, पूर्वतन्त्रीयभूमाधिकरणन्यायेन संपृक्तासंपृक्तसमुदाये संपृक्तशब्दस्य गौणत्वात् । तयोर्द्वयोरपि विद्ययोः समुदायघटकत्वस्य कविसम्मतत्वात् अत्र सर्वत्र मन्त्रस्य तत्प्रतिपाद्यदेवतायाश्च अभेदध्यानस्य शास्त्रसंमतत्वात् विद्यायाः विद्याबोध्यसुन्दरीरूपचैतन्यस्य च अभेदेन व्यवहार इति ध्येयम् ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथवा सर्वा अपि विद्याः संपृक्ताः इति ब्रूमः, ककारहकाररूपशिवाक्षरयोः ह्रींकारभिन्नान्याक्षररूपशक्त्यक्षराणां च सर्वविद्यासु सत्वात्। ततश्च वागर्थकलामयादिरूपसंपृक्तविद्योपास्याविवेति नान्वयः, अपि तर्हि संपृक्तवागर्थकलामयादिरूपविद्यान्तरोपास्याविव संपृक्ताद्यविद्योपास्यौ पार्वतीपरमेश्वरौ वन्दे इति कवेर्हृदयमिति न गौण्या अपि वृत्तेः संपृक्तशब्दे अंगीकारावश्यकता सा हि सुन्दरी सर्वविद्यासु शिवकामेश्वराङ्कस्थचैतन्यरूपा भासते इति उक्तपूर्वमेतत्। तमिमं द्वैपायनाभिसंधिमाश्रितवतो महाकवेस्सूत्रे न केनापि प्रकारेण दोषलेशमप्यारोपयितुमिन्द्रोपीशीतेति स्थितम्। एवं "वैवस्वतो मनुर्नामेति" गायत्रीपरसूत्रेणापि गायत्रीत उद्ध्रियमाणसुन्दरीचैतन्यमेव प्रतिपादितं व्यंजनयेति अहो महाकवेर्गाम्भीर्यातिशयः श्रीमदगस्त्येन सुन्दरीचैतन्यग्रथननिष्ठेन रक्षोवधसाधकतया श्रीमद्रामचन्द्रायोपदिष्टादित्यहृदयात्मकमन्त्रेणापि श्रीमत्सुन्दरीरूपं सर्वचैतन्यमेव व्यंजनया बोध्यते इति कवेर्हृदयं, यत एवमाह महाकविः "पूर्वसूरिभिः चरिते वर्त्मनि मे गति" रिति। ततश्च चतुर्विंशतिसहस्रग्रन्थरामायणस्यापि सर्वचैतन्यसुन्दरीपरता व्यंजिता, अत एव प्रतिसहस्रग्रथारंभे गायत्रीयाक्षराणां क्रमशश्चतुर्विंशतिसंख्याकानां निर्देशोप्यवकल्पते।

ननु वाल्मीकिमहर्षिभिः चतुर्थपादाक्षरादिकानि सहस्राणि न निबद्धानि श्लोकानामिति न पंचदशाक्षरीबोधने तेषां तात्पर्यमिति चेत्, न, न्यायेन तल्लाभात् अत एव हि तेजआदिकसृष्टिश्रुतावपि शाखान्तरीयवचनोपसंहारेण आकाशवाय्वोः प्रथमं सृष्टिस्तत्रापि व्यासादिसम्मता॥

इह च रामायणे चतुर्थपादादिकश्लोकानिबंधेऽपि पादत्रयाक्षरादिकश्लोकान् अनुसंदधानाः श्रीविद्याक्षराणि यथोद्धरेयुः एवमवशिष्टाक्षराण्यपि तापिन्युपनिषदुक्तरीत्या गायत्रीचतुर्थपादानुसंधानेन उद्धरेयुरिति महर्षितात्पर्यात्। पादत्रयापेक्षया तुरीयपादस्य अतिरहस्यरूपत्वात्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशिष्टाधिकारिजप्यत्वमभिप्रेत्य महर्षिणा गोपनायैव तादृक्छ्लोकाः न निबद्धाः। आचारदर्शनाच्च। आचारं चैवमेवेह पश्यामः। ये ये हीह गायत्रीजापिनः न तान् चतुर्थपादजपमाचरतः पश्यामः। पश्यामस्तु त्रिपदगायत्रीजपमाचरतः। तन्निबन्धनमेव वाल्मीकिमहर्षेस्तावत्संख्याकश्लोकसहस्ररचनाचार इति च पश्यामः। न चैतावता श्रुत्यवगतस्य चतुर्थपादस्यापह्नवः शक्यः। श्रुत्यवगतत्वादेव। नचैवमेव महर्षेर्वाल्मीकेर्मतं, यत्त्रिपाद्येव गायत्रीति। यथा मोक्षोपाये वासिष्ठ रामायणे वाल्मीकीये विरलप्रचारे विशिष्टाधिकारिके द्वात्रिंशत्सहस्रश्लोकीरचनाचारं महर्षेः पश्यामः। यथाचात्र चतुष्पदगायत्रीपरता तदनु च तद्रहस्यार्थपंचदशाक्षर्यवगतिः सर्वं तत् सांप्रदायिकगुरुमुखादवगन्तव्यमिति न तद्विवरणे प्रयतामहे॥

यः पुनः संप्रदायादवगन्तुं न पारयति, जिज्ञासते च नितरां, समनुगृह्णीमो लेशेन। ननु कोयं संप्रदायः, येन वासिष्ठरामायणे आद्यविद्यावित्तिः संगृह्येतेति चेत् संगृह्णीम इमं संप्रदायं। आदितो मङ्गलमाचरन् महर्षिः श्लोकत्रयेण सच्चिदानन्दरूपं ब्रह्म नमस्करोति—

यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः॥ १॥
ज्ञाता ज्ञानं तथा ज्ञेयं द्रष्टा दर्शनदृश्यभूः।
कर्ता हेतुः क्रिया यस्मात् तस्मै ज्ञप्त्यात्मने नमः॥ २॥
स्फुरन्ति सीकरा यस्मात् आनन्दस्यांबरेऽवरे।
सर्वेषां जीवनं तस्मै ब्रह्मानन्दात्मने नमः॥ ३॥

इति। तदनु च शास्त्रार्थोपबृंहणरूपेतिहासावतारप्रसक्तिमाख्याय इतिहासमारभमाणः आद्यविद्यारूपां परदेवतामेव सुन्दरीं स्वग्रन्थप्रमेयां नमस्करोति या सच्चिदानन्दरूपब्रह्मात्मना त्रिपुरातापिन्याद्युपनिषत्सु प्रतिपादिता महर्षिणा च तद्रूपेणादौ नमस्कृता "दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः। यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः" इति। "ननु नैवं संभवति सुन्दरीं नमस्करोतीति, किं कारणं?

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

असंप्रत्ययः, नखल्वितः श्लोकात् सुन्दरीं संप्रतीम इति"। इति चेत् तत्र पर्यनुयुञ्ज्मः कं पुनरर्थं संप्रतीथेति?, ननु द्युभूम्यन्तरिक्षान्तर्बहिरवभासमानं (अवभासस्वरूपं) सर्वात्मविभुं संप्रतीम इति चेत् हन्त त्रिपुरातापिन्युपनिषदाद्यनुशिष्टा सुन्दर्येवैषोऽर्थ इति सिद्धं नः समीहितं यत्र बादरायणः प्रमाणतयोदाहृतः "सर्वचैतन्यरूपां तामाद्यां विद्यामधीमहि। सिद्धिं या नः प्रचोदयात्" इति श्लोकस्य रचयिता। ननु चैवं तर्हि "सर्वत्र भासमानाय विभवे भानरूपिणे। सर्वेषामात्मभूताय परस्मै ब्रह्मणे नम" इति रचयितव्यं, यावता तापिन्यर्थः संगृह्येतेति चेत्, सत्यं, तथापि द्वादशधामानुस्यूतचैतन्यबोधः स्फुटं भवत्विति एवं निर्देशो महर्षेर्वाल्मीकेः। ननु कथं पुनः महर्षिनिर्देशः द्वादशधामावबोधकः? इति चेत् तदुच्यते—दिवीति स्वप्न इत्यर्थः। दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्न कान्तिगतिष्विति स्वप्नार्थत्वस्मरणात्। भूमौ-व्यवहारस्य शास्त्रीयस्य लौकिकस्य वेति शेषः। तथाच जाग्रति इति सिद्धं। आकाशे-सुषुप्तौ, भौतिकस्य अन्तःकरणवृत्त्यात्मकस्य वा पदार्थस्याभानेन अविद्यावृत्तिमतः प्रकाशस्यैवात्मरूपस्य तदा सत्त्वात्। यो विभाति–विविधं भाति-विश्वतैजसप्राज्ञविराड्ढिरण्यगर्भाव्याकृतसंबंधिनोरारोपापवादयोरधिकरण-त्वेन भाति। तथाभाने हेतुमाचष्टे विभुरिति। भूधातोर्डुप्रत्ययः "विप्रसंभ्योड्वसंज्ञायां" इति पाणिन्यनुशासनात्। विविधभवनयोग्यः इति तदर्थः। नन्वीदृशभवनवान् सावयवः प्राप्नोति ततश्चानित्यः प्राप्नोति इति चेन्न अवभासात्मेति हेतोः। यश्चासाववभासात्मा स एव सर्वेषामात्मभूतः। ततश्च यत् स्थानत्रयादिकं तत् अनात्मभूतं सर्वेषां, न चानात्मनाशे मात्रयप्यात्मा दुष्येदिति भावः। ननु स्वर्गभूम्यन्तरिक्षाख्यानाः, द्युभूम्याकाशशब्दाः न स्थानत्रयाख्यानाः, प्रसिद्धेरिति चेत् तत्राह—बहिरन्तश्चेति। बहिरिति जाग्रत् अन्तरिति स्वप्नसुषुप्तीबोध्येते। विद्याया गोपनीयत्वात् न जाग्रदादिपदैः व्यवहारः कृतः। न चैतावता विद्याया अबोधः प्राप्नोतु इति व्याख्यानं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदद्वयेन कृतमिति महर्षिहृदयम् । अनयैव दिशा समग्रेतिहासस्य मोक्षोपायाख्यस्य सुन्दरीपरता ज्ञेया । आत्मशब्दः पुंलिङ्ग इति य इत्यादि निर्देशः सुन्दरीपरोपि न दुष्यतीति ज्ञेयम् ॥

तत्सिद्धं कविसूत्रस्यानेकार्थवर्णनमलंकार एवेति। कविसूत्रे "वन्द" इति अभिवादनस्तुती बोध्येते। ताभ्यां चांगाभ्यां तत्पूर्वतनान्यंगान्याक्षिप्यन्ते। फलार्थत्वात्सर्वांगोपसंहारकर्तव्यतायाः साधितत्वात्। पूर्वपूर्वांगानन्तर्यविशिष्टं हि उत्तरोत्तरमंगमनुष्ठेयं इति मीमांसकमर्यादा यतः॥

अतः श्रीमच्छंकरभगवत्पादादिभिरुपदिष्टदिशा "पाद्यं आभरणावरोपणं, सुगंधितैलाभ्यंगं, मज्जनशालाप्रवेशनं, मज्जनमण्टपमणिपीठोपवेशनं, दिव्यस्नानीयोद्वर्तनं, उष्णोदकस्नानं, कनककलशच्युतसकलतीर्थाभिषेकं, धौतवस्त्रपरिमार्जनं, अरुणदुकूलपरिधानं, अरुणकुचोत्तरीयं, आलेपमण्टपप्रवेशनं, आलेपमण्टपमणिपीठोपवेशनं, चन्दनागरुकुंकुममृगमदकर्पूरकस्तूरीगोरोचनादिदिव्यगंधसर्वांगविलेपनं,— केशभरस्य कालागरुधूपं, मल्लिकामालतीजातीचंपकाशोकशतपत्रपूगकुह्मलीपुन्नागकल्हारादिसर्वर्तुकुसुममालां, भूषणमण्टपप्रवेशनं, भूषणमण्टपमणिपीठोपवेशनं, नवमणिमकुटं, चन्द्रशकलं, सीमन्तसिन्दूरं, तिलकरत्नं, कालांजनं, पालीयुगलं, मणिकुंडलयुगलं, नासाभरणं, अधरयावकं, प्रथमभूषणं, कनकाचिन्ताकं, पदकं, महापदकं, मुक्तावलिं, एकावलिं, छन्नवीरं, केयूरयुगलचतुष्टयं, वलयावलिं, ऊर्मिकावलिं, कांचीदाम, कटिसूत्रं, सौभाग्याभरणं, पादकटकं, रत्ननूपुरं, पादांगुलीयकं, एककरे पाशं, अन्यकरेऽङ्कुशं, करान्तरे पुंड्रेक्षुचापं, अपरकरे पुष्पबाणान्, श्रीमन्माणिक्यपादुके, आवरणदेवताभिः सह महाचक्राधिरोहणं, कामेश्वरांकोपवेशनं, अमृतासवचषकं, आचमनीयकं, कर्पूरवीटिकां, आनन्दोल्लासविलासहासं, मंगलार(रा)र्तिकं, छत्र, चामर, दर्पणतालवृन्तगंध पुष्प, धूप, दीपनैवेद्यानि, मुद्राः, सावरणदेवीपूजाः प्रदक्षिणं, नमस्कारं, जपं, स्तोत्रं च "भावयेत् इत्यनुष्ठेयार्थावगतेः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तोत्रात् पूर्वतनान्यंगान्यनुष्ठाय स्तौमीति व्यंजितं भवति। यः पुनरियदंगानुष्ठानं सार्वभौमैकसाध्यमिति उदासीत, तमप्यनुगृह्णन्ति महर्षयः। यत एवमाहुः "तत्तद्द्रव्येणोपचारानभावे कुसुमाक्षतैः। मनसा भावयन् कुर्यात्तेन पूजाफलं लभेत्' इति ॥

ननु कवयन्तोऽनेके मंगलश्लोकमादौ रचयान्ति, नेमानेवं पूजयतः पश्यामः। "न (हि) कदाचिदनीदृशं जगत्" इतिचास्त्याभाणकः, तत्कुतस्त्योयं वः कालिदासीयपूजानुष्ठानावगमः इति चेत्—लोकत इति ब्रूमः। पश्यामः खलु ईदृग्विधे प्रवर्तमानान् शिष्टान् इष्टदेवतामाराधयतो लोके। न च क्वाचित्कं दर्शनं अर्थासाधकमिति वक्तुमर्शिमहे। तदिह शिष्टाग्रगण्यस्य कवेरेवमनुष्ठानमभ्यूहामः॥

अथवा उपक्रमोपाक्षिप्तानां मन्त्राणां "आप्लवस्व प्रप्लवस्व आण्डी भव ज मामुहु" इत्येवमादीनां अर्थानुसंधानेन परामंबामभेदेन ध्यायन् आनन्दभरभरितः तां स्तौति इति वन्दे इति पदप्रयोगात् निष्कृष्टमर्थं जानीमहे। तस्मादुपपन्नं ब्रह्माण्डपुराणादिविमर्शनेन कृतमुपव्याख्यानं ॥

उपपन्नतरं च सर्वशास्त्रतत्वमनुसंदधानः महाकविः कालिदासः परांबामनुस्मरतिः—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥

इति, तत्रैतौ श्लोकौ भवतः—

"श्रीकालिदासकविराट् ललितामंत्रादितत्वज्ञः।
सर्वेष्टदां परांबामीट्टे कामेश्वरांकस्थां ॥
वाग्देवीभिः स्वचित्ते दृढतरकलितौ श्रीमदंबापरेशौ।
वागर्थौ सूरिवन्द्यावनुपमविभवौ श्लेषिणौ चक्रराजे ॥
सर्वार्थान् वन्दनोत्थान् कथयति कविराट् श्रीवशिन्यादिदृष्टैः।
सर्वैर्मार्गैरितीदं बहुमुखमुदितं सूत्रमार्षार्थपुञ्जम् ॥ इति।

तत्सिद्धं वेदाः प्रमाणमिति,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तदनु च श्रीशिवः शरणमिति ॥

ओन्तत्सत् ।

एतदपेक्षितार्थानां संग्रहश्च परानुस्मरणस्फूर्तिपरिशिष्टे प्रकाश्येतेति इयता विरम्यते ॥

इति श्रीमन्महामहोपाध्याय सर्वतन्त्रस्वतन्त्र श्रीमत्त्यागराजमखिवर, महामहोपाध्याय श्रीमत्सुन्दरशास्त्रिमहाशय, महामहोपाध्याय श्रीमत्पंचापगेशशास्त्रिवर्य गुरुपरंपरावाप्तब्रह्मविद्यालेशस्य, श्रीमन्महामहोपाध्याय त्यागराज मखिवर मीमांसकमूर्धन्य श्रीमद्रामशास्त्रिवर्य महामहोपाध्याय श्रीमद्वैद्यनाथशास्त्रिवर्य गुरुपरंपरावाप्ताध्वर मीमांसामर्मलेशस्य पण्डितप्रवर (शृंगगिरिजगद्गुरुसंस्थान) वेदान्तविशारद (मद्रास्) मीमांसाविद्व (मैसूरु) मैसूरुसंस्थानमहाविद्वत्पण्डितरत्न बिरुदस्य मैसूरु श्रीमन्महाराजसंस्कृतमहापाठशालाधर्मशास्त्रविभागे प्रधानाध्यापकस्य श्रीशिवसुब्रह्मण्यशास्त्रिणः कृतिषु महाकविहृदयरत्नाकरे परानुस्मरणस्फूर्तिर्नाम तृतीयो मणिः श्रीशिवःशरणम्

---

* प्रियपाठकमहाशयेषु विज्ञापना —

विकृतिवत्सरीयवासन्तग्रैष्मसंचिकयोः परानुस्मरणस्फूर्तिविभागे २४ पुटे द्वादश्यां पंक्तौ १ इत्यंकात् पूर्वं तद्वत्सरीयवार्षिकसंचिकायां २५ पुटे विद्यमानतृतीयचतुर्थपञ्चमपङ्क्तयोनुसंधेयाः ॥

एवं तत्रैव चतुर्दश्यां पङ्क्तौ १ इत्यङ्कात् पूर्वं पूर्ववत् २५ पुटे विद्यमानां षष्ठीं पङ्क्तिमारभ्य २६ पुटे सप्तमपङ्क्तौ "तदनुक्रमिष्यामः" इत्येतत्पर्यन्तो भागः अनुसंधेय इति। अंशद्वयमिदं मुद्रापकप्रमादात् स्थानान्तरे योजितमिति ॥ *

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शुद्धाशुद्धपत्रिका

		अशुद्धम्	शुद्धम्
२६ संपुटे १-२ सञ्चिकयोः—			
१० पुटे	३ पङ्क्तौ	छागः	यागः
,,	९	श्रुतिः	स्तुतिः
२० पङ्क्तेरनन्तरं २२ पङ्क्तिः पठनीया			
११ पुटे	३	तञ्चो	नंचो
१३	१०	गमि	गेइ
१४	१०	नव	न, व
१४ पुटे २१ पङ्क्तौ दृश्यत्वेन विकासते इत्यस्यानन्तरं २२ पंक्तिस्थः "यतिषु इत्याद्यः—कामं जायते" इत्यंतः अंशो ज्ञेयः.			
१५	१०	क्षतेरे	क्षरे
१७	२	काव	कवि
१७	१४	जपेन	जपे न
१९	६	रिसभु	रिसंभु
२०	१२	च की	च। की
२०	२३	तध्द्या	तद्धा
२१	४	माष्ट	मष्टि
२१	८	हम	हस
२२	११	दिद	दिदं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रबन्धसमालोचनम्

शास्त्रीयलक्षणपरिष्कारपरिशीलनपरायणानां पदशक्त्यवधारण-समुत्सुकानां सहृदयानां कृते विनिवेदनम्—श्रीमद्भिः भिक्षुगौरीशङ्कर-महोदयैः समाकलितं सर्वतन्त्रसिद्धान्तपदार्थलक्षणसङ्ग्रहाभिधानं प्रबन्धं श्रीमन्महीशूरश्रीमन्महाराजसंस्कृतमहापाठशालीयत्रैमासिक—संस्कृतपत्रिकासमितेराशयमनुसृत्य आमूलाग्रं परिशीलितवतामस्माकं इयं मनीषा समुन्मिषति—

प्रबन्धेऽत्र अनेकशास्त्रेषु निरूपिताः प्रधानभूताः लक्षणपरिष्काराः पदार्थाश्च सङ्गृहीताः। ते च आहत्य सङ्ख्यया (८९०१) एकाधिकनव-शत्युत्तराणि अष्टौ सहस्राणि ॥

ईदृशानां लक्षणानां सद्भावे तावत् प्रमाणानि इमानि "पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या" उपरिष्टाल्लक्ष्मा याज्या "(तै. सं.)" अथातः शेष-लक्षणम्" ॥ (जै-सू.) वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् । अवि-प्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् "। (या. स्मृ.) "त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशोलक्षणं परीक्षा चेती" (न्या. भा.) त्यादीनि ॥

अथ लक्षणज्ञानजन्याभि प्रयोजनानि विचार्यन्ते दुर्लक्षणप्रतिमा-प्रतिष्ठापनप्रयुक्तस्य स्त्रीहान्यादेरनिष्टस्य परिहारः, सुलक्षणप्रतीकप्रति-ष्ठाफलीभूतसकलसन्मङ्गलसम्पत्तिः । प्रतिमापीठपरिकल्पनपरिकरः पुंस्त्रीशिलाविवेकः, लघूपायेन प्रभूतपदार्थस्वरूपनिर्धारणं इतरभेदनिर्णयः व्यवहारश्चेत्यादीनि इति।

अत्र प्रमाणानि प्रकाश्यन्ते—

"हन्त्यर्थहीना कर्तारं मन्त्रहीना तु ऋत्विजम् ।
स्त्रियं लक्षणहीना तु न प्रतिष्ठासमो रिपुः ॥
(ध. सि.)

"पुंशिला प्रतिमार्थं तु स्त्रीशिला पीठकल्पये ।
स्वरस्थूलत्वभेदेन पुंस्त्रथाद्या जातिभिः शिलाः ॥
(तं. सा.)

"लिङ्गं सलक्षणं पूज्यं त्यजेल्लिङ्गमलक्षणम् ।
तस्मात्सर्वप्रयत्नेन लिङ्गं कुर्यात्सलक्षणम् ।

ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः। व्यावृत्तिर्व्यवहारोवा लक्षणज्ञानस्य प्रयोजनम्। एवमादीनि अभियुक्तवचनानि।

एतेन कीटसङ्ख्यापरिज्ञानवत् लक्षणज्ञानं निष्प्रयोजनमिति केषाञ्चिदाशङ्का दूरीकृता भवति। यद्यपि न्यायकोशादिग्रन्थेभ्य एव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एषां प्रयोजनानां लाभः संभाव्येत तथापि तेषु ग्रन्थेषु एकैकशास्त्रमात्र-सिद्धाः परिष्कारादयः बाहुल्येन विशदं निरूपिताः, अत्र तु अनेकशास्त्र-सिद्धाः आवश्यकाः कतिपय एव परिष्कारादयः सङ्गृह्य प्रकाशिता इति नास्य प्रवन्धस्य वैफल्यम्। एवं सङ्ग्रहेण निरूपणपराणां एतत्प्रबन्ध-प्रणेतॄणां " अनन्तशास्त्रं बहु वेदितव्यं स्वल्पश्च कालो वहवश्च विघ्नाः॥ इति न्यायएव शरणम्।

प्रबन्धेऽत्र अद्वैतवेदान्तशास्त्रीयाः परिष्कारादयः प्रचुराः, न्याय-शास्त्रीयाः ते ततोन्यूनाः, अन्यशास्त्रीयाः ते ततोऽपि यथायोगं न्यूनतराः, परिशीलिताः, तांश्च स्थालीपुलाकनयेन प्रतिशास्त्रं एकैकोदाहरणप्रदर्श-नेन स्फुटीकुर्मः—

१. अद्वैतवेदान्ते अखण्डार्थत्वं–सजातीयविजातीयस्वगतभेद-शून्यार्थत्वम्॥

२. विशिष्टाद्वैते विशिष्टाद्वैतं–सूक्ष्मचिदचिदात्मकशरीरविशि-ष्टस्य कारणस्य परमात्मनः स्थूलचिदचिदात्मकशरीरविशिष्टस्य कार्यस्य परमात्मनश्चैक्यम्।

३. द्वैतवेदान्ते–द्वैतवादः–जीवेश्वरादिभेदनिर्णायकः कथा-विशेषः॥

४. पूर्वमीमांसायां प्रतिपत्तिकर्मत्वं–उपयोक्ष्यमाणसंस्कारभिन्न-संस्कारकर्मत्वम्॥

५. न्याये इन्द्रियत्वं–शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनस्संयोगाश्रयत्वम्॥

६. व्याकरणे सामर्थ्यं–पृथगर्थानां पदानां विशिष्टैकार्थोपस्थिति-जनकत्वम्॥

७. ज्यौतिषे व्यतीपातः–श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तकैः। अमाचेद्रविवारेण व्यतीपातः सउच्यते" इति श्लोकनिरुक्तः॥

८. अलङ्कारे तुल्ययोगोपमा–समानजातीयक्रियाकरणे प्रस्तु-ताप्रस्तुतयोः साम्याभिधानम्॥

९. धर्मशास्त्रे बकवृत्तिः—

"अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः।
शठः शिल्पी विनीतश्च बकवृत्तिरुदाहृतः॥

इति श्लोके वर्णितः॥

१०. छन्दःशास्त्रे त्रिष्टुप्–चतुश्चत्वारिंशदक्षरकछन्दः॥

११. पुराणे अक्षौहिणी–अयुतं च नागाः परियुतं रथानां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्षैकयोद्धा-दशलक्षवाजिनः । पदातिसंख्या षट्त्रिंशत्कोटयः अक्षौहिणीं तां मुनयोवदन्तीति प्रमाणप्रमिता ॥

१२. साङ्ख्ये प्रकृतिः-अजन्यत्वे सति जनिका ॥

१३. योगे ईश्वरः-क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः॥

१४. आयुर्वेदे गर्भः-देहजन्मकारकशुक्रशोणितसंयोगजन्यमांसपिण्डः।

१५. श्रौतसूत्रे, चमसः-चतुरस्राकारः समुष्टिकः दारवः पात्रविशेषः। इति ॥

एकस्मिन्नपि शास्त्रे मतभेदेन परिष्कारभेदनिरूपणं कृतमत्र। तद्यथा—अलङ्कारशास्त्रे काव्यपदार्थनिर्वचनावसरे "कवेः कर्म, रसात्मकं वाक्यम्, इष्टार्थव्यवच्छिन्ना पदावली, रमणीयार्थप्रतिपादकः शब्दः, अर्थदोषशून्यत्वे सति व्याकरणादिदोषरहितः" इति ॥

अपि च एकस्यैव पदस्य शास्त्रभेदेन भिन्नार्थवर्णनं प्रबन्धेऽत्र विलसति तद्यथा—

मोक्षः—स्वातन्त्र्यं मृत्युर्वेति चार्वाकाः। उत्तराधरभावेन निरन्तरोत्पादक्लेशादिदोषदूषितबोधसन्ततिविच्छेद इति माध्यमिकाः। पुनर्भावनाप्रकर्षपरिलब्धपरिशुद्धचित्तसन्तान इति योगाचाराः। धर्मिनिवृत्तौ निर्मलज्ञानोदयोमहोदय इति विज्ञानवादिनः। प्रलीननिखिलोपाधेः क्षेत्रज्ञस्य सततोर्ध्वगतिरिति जैनाः। आनन्दमयपरमात्मनि जीवात्मलय इति त्रिदण्डिनः। जीवस्य लिङ्गशरीरापगम इति भास्करीयाः। अक्षयशरीरादिलाभः, विष्णुभक्तिधर्माचरणाद्विष्णुलोकगमनं वेति वैष्णवाः। सर्वकर्तृत्वमेकं विहाय वासुदेवस्य सर्वज्ञत्वादीनां कल्याणगुणानामाप्तिमत्त्वे सति भगवद्याथात्म्यानुभव इति रामानुजीयाः। जगत्कर्तृत्व, लक्ष्मीपतित्व, श्रीवत्सवर्जं भगवज्ज्ञानायत्तनिर्दुःखपूर्णसुखमिति माध्वाः। द्विभुजकृष्णेन सह स्वांशभूतानां जीवानां गोलोके लीलानुभव इति वल्लभीयाः। पारमैश्वर्यप्राप्तिरिति माहेश्वराः। चन्द्रचूडवपुषः सतः पार्वत्यालिङ्गनमिति कापालिकाः। पूर्णात्मतालाभ इति अभिनवगुप्ताचार्याः। पाशुपतधर्माचरणात्पशुपतिसमीपगमनमेव पुनरावृत्तिरहितमिति पाशुपताः। पञ्चाग्निविद्याद्युपासनैः आर्चिरादिमार्गेण हिरण्यगर्भप्राप्तिरिति हैरण्यगर्भाः पारदरसपानेन देहस्थैर्यमिति रसेश्वरवादिनः ॥

आत्यन्तिकैकविंशतिदुःखध्वंसः स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः इति तार्किकाः। स्वर्गादिरिति मीमां-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सकाः । दुःखसाधनशरीरनाशे नित्यनिरतिशयसुखाभिव्यक्तिरिति तदेकदेशिनः । नित्यसुखसाक्षात्कार इति भाट्टाः । आत्यन्तिकदुःखप्रागभावपरिपालनमिति प्राभाकराः । परा पश्यन्ती मध्यमा-वैखरीति वाणीचतुष्टये प्रथमायाः पराख्यायाः ब्रह्मरूपायाः वाण्याः दर्शनमिति पाणिनीयाः । पुरुषस्य निर्लेपस्य कैवल्येनावस्थानमिति योगिनः । प्रकृतिपुरुषविवेकदर्शनात् तदविवेकनिवृत्तौ पुरुषस्य स्वरूपेणावस्थानमिति साङ्ख्याः । चित्तानुत्पादनमित्यन्ये । संसारोपरम इत्यपरे । आत्महानिरित्येके । निखिलदुःखनिवृत्तिपुरःसरं स्वात्मानन्दावाप्तिः । विद्यानिरस्ताविद्यातत्कार्यब्रह्मभावापत्तिरिति वेदान्तिनः । इति ॥

किं च अपूर्वपदार्थाः केचनात्र सङ्गृहीताः ।

यथा, अक्का–माता । शाश्वतः अन्धकारशून्यः अप्रतिसमाधेयः इति ॥

अन्यच्च सर्वशास्त्रोपकारकाः के चन परिष्काराः अत्र ग्रथिताः । यथा—किन्तुत्वं–प्रागुक्तविरुद्धार्थत्वं पूर्ववाक्यसङ्कोचज्ञापकत्वम् । तद्-घटकत्वं–तद्विषयत्वाव्यापकविषयतावत्त्वमित्यादयः ॥

एतेषां परिष्कारादीनां निरूपणमपि नवीनसरणिमवलम्ब्य अक्कारादिक्रमेणैव प्रबन्धेऽस्मिन् दरीदृश्यमानं आधुनिकजिज्ञासूनां सुगमम् । पुस्तकस्यैतस्य अर्घोऽप्यल्पीयानेव द्वादशाणकपरिमितः ।

एवमादिगुणपरिकर्मितः प्रबन्धोऽयं विदुषां विद्यार्थिनाञ्च महते उपकाराय कल्पते इति निःसंशयं सुवचम् ॥

किं बहुना–एतत्प्रबन्धप्रकाशकं पुस्तकं षष्ठेन संस्करणेन संस्कृतं अद्य अस्मद्दृष्टिपथमवतीर्णमित्यनेनैव बहवः परिष्कारादिविमर्शनलालसाः प्रबन्धेनानेन महान्तमुपकारमन्वभूवन्निति ज्ञायते ।

(उपसंहारः)—अतः एतादृशप्रबन्धप्रणेतृभ्यः श्रीमद्भिक्षुगौरीशङ्करमहोदयेभ्यः, एतत्पुस्तकमुद्रापणेन व्यञ्जितसारस्वतानुरागायै श्रीमत्यै मनोभरिदेव्यै च सङ्ख्यातीतान् धन्यवादान् सामोदं सूचयामः ॥

इति

सि. रामचन्द्राचार्यः,
पूर्वमीमांसा प्रधानोपाध्यायः,
श्रीमन्महाराज संस्कृत महापाठशाला,
महीशूरपुरी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीः

चिद्विलासविमर्शः

अयि पाठकमहोदयाः,

चिद्विलासनामकं पुस्तकं अस्यै पाठशालायैः समुपहृतं, शिक्षामन्त्रिणा सम्पूर्णानन्दमहाशयेन लोकोपकारार्थं विरचितं हिन्दीभाषायां रामाज्ञापाण्डेयेन च गैर्वाण्यानूदितं ग्रन्थरत्नम् महता प्रमोदभरेण संवेदयामः। स च ग्रन्थसन्दर्भः-आधारखण्डं-ज्ञानखण्डं-धर्मखण्डमिति काण्डत्रयोपेतः। तस्य च ग्रन्थस्य विषयसौन्दर्यं लोकोपकारकतां पुरुषार्थोपयोगितां व्यवहारौपयिकतां चोद्वीक्ष्य संस्कृतकोशसमृद्ध्यर्थं सरलया लोकोत्तरसरण्या गैर्वाण्या वाण्या विरचितोऽनुवादो विराजते, 'चिद्विलास' इति नामान्वर्थतां भजते। अस्मदीयशालाध्यक्षप्रेरणया संस्कृतप्रेमितया च बह्वधिकरणसंवलितस्य विमर्शः यथामति कर्तुं उपक्रम्यते—आमूलाग्रं परामृश्यमानेऽस्मिन् ग्रन्थे नैतत्तिरोहितं यत्—दार्शनिका अपि विषयाः व्यवहारसरणिसञ्चारितास्सन्तः शास्त्रेऽनतिक्रतश्रमाणामपि सुगमा इति, अन्ततश्च—ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे। धर्मादर्थश्च कामश्च सधर्मः किं न सेव्यते। इति व्यासवचनस्य सम्यग्दर्शनसम्पन्नः कर्मभिर्न स बध्यते। दर्शनेन विहीनस्तु संसारं प्रतिपद्यते। विद्यार्थी वा कलाकारोऽथवा वैज्ञानिकोनरः। आत्मानं ये पृथक् कर्तुं प्रपञ्चात्सम्भवन्त्यपि। त एव कर्माणि स्वीये प्रभवा इति व्यवस्थितिः। इत्याभाणकानां च तात्पर्याविष्करणं पौरुषवादिनामपि चित्ताकाङ्क्षादुर्युक्तिनिर्णेजकमिति पर्यवस्यति। धर्मस्य ज्ञानस्य योगस्योपासनायाश्च सृष्टिप्रलययोः अवस्थात्रयस्य च परमपुरुषार्थौपयिकत्वं तेषां स्वरूपं साधनप्रका ावश्यकताश्च सोदाहरणं यथावबोधं नातिविस्तरेण हृदयंगमतया प्रतिपादितं विद्यतेऽस्मिन् ग्रन्थे॥

एवं व्यावहारिकदृष्टिमपास्य दुर्लभं तत्वदर्शनं दुर्लभा सहजावस्था इति वचनमनुसृत्य शास्त्रीयदृष्टिकोषेन समवलोकनेऽपि ग्रन्थस्यास्य महत्त्वं रूढमूलमनपलपनीयं च वरीवर्ति, चिद्विलासग्रन्थे च परामृश्यमाने अद्वैतवेदान्तप्रकरणलक्षणं समन्वितं दरीदृश्यते।—संसर्गो वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशिष्टो वा वाक्यार्थो नात्र सम्मतः। तादात्म्यमत्र वाक्यार्थः तयोरेव पदार्थयोः। तत्त्वमस्यादि वाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्या-सह कार्येण नासीदस्ति भविष्यति। इत्यादिवचनैः प्रतिपाद्यमानाः—जीवब्रह्मैक्यं, अतिदुर्लभमनुष्यजन्ममुख्यभूतनिर्मृष्टनिखिलदुःखानुषङ्गा-द्वितीयकूटस्थचिदात्मकपरमानन्दपदप्राप्तिरूपमोक्षः तत्त्वज्ञानेनाविद्यायां प्रशान्तायां तत्सिद्धिः, प्रपञ्चश्च तादृशैक्याज्ञानेन तस्मिन् कल्पितः, अवि-द्यानिवृत्त्युपलक्षितपूर्वोपदर्शितमोक्षश्चेत्यादिविषया अद्वैतसिद्धान्तसार-भूता एवात्र नवीनया गमनिकया प्रतिपिपादयिषिताः। यतः २१-तमे पृष्ठे-सर्वेषु चेतनेषु तस्यैव ज्योतिरस्ति तस्यैवाभिव्यक्तिरस्ति। अनया दृष्ट्या आत्मा ब्रह्म कथ्यते। इत्यादिना कण्ठरवेणैव समर्थितम्। यः शरीरा-भ्यन्तरे प्रेरकः आत्मास्ति ब्रह्म चित्तानुयोगादेकमप्यनेकम्भवति। चित्त-मेव ब्रह्मणो मुख्योपाधिः। इत्यादिना चिद्विलासस्यापि जीवब्रह्मैक्यं विषयः इत्यवगम्यते, तथैव १२३ तमपृष्ठेऽपि आत्मा एकोऽस्ति, तस्य-स्वरूपं सच्चिदस्ति, दिक्कालाद्यपरिच्छिन्नः चित्तोपाधिविशिष्ट आत्मा अर्थाज्जीवःसम्पद्यते चित्तमसंख्यातसंस्काराणां भाण्डागारोऽस्ति। संस्कारवैषम्यं जीवानां भेदकारणमस्ति, इति स्फुटमुक्तम्। किञ्च आत्मा अपरिणामी, चित्तं मायाकार्यं परिणामि,—अन्यत्र च—योगिनामीदृशी अनुभूतिर्भवति, यदस्य विश्वस्य मूलमद्वितीयं एकं परमसूक्ष्मं चिद्घना-नन्दमयं तत्त्वमस्तीति, तस्य शक्तिरविद्या-तया जगदाविर्भावः। इति प्रपञ्चस्याविद्यकत्वं स्पष्टमुट्टङ्कितम्। १२९ तमे पृष्ठे च ब्रह्मण उपाधिर्मा-यास्ति, ब्रह्म प्रपञ्चकारणं न स्वरूपेण-ब्रह्मीभूतो भवन्नपि न ब्रह्मणो व्यतिरिक्तः। ब्रह्म चिन्मात्रमस्ति असम्प्रज्ञातसमाधौ चित्तं न तिष्ठति, तस्यामवस्थायामात्मनः शुद्धब्रह्मरूपेण स्थितिर्जायत इति वदता ग्रन्थ-कारेण श्रवणमनननिदिध्यासनादीनां मोक्षसाधनत्वं प्रतिपादितमिति-शास्त्रैकदेशसम्बद्धं शास्त्रकार्यान्तरे स्थितम्। आहुः प्रकरणं नाम—इति लक्षणं उपपद्यत एवास्य॥

मुख्यदृष्टिश्च ग्रन्थकारस्य चित्तवैमल्यसम्पादनप्राधान्ये। चित्त-दोषादेव शुद्धोऽप्यशुद्ध इवैकोऽप्यनेक इव अकर्तापि कर्तेव मुक्तोऽपि बद्ध-इवात्मा भातीति। चित्तस्य च मलानि बहुविधानि पापाख्यमेकं मलम्, तच्च निष्कामकर्मानुष्ठानेनापैति, व्यग्रताख्यमपरं चित्तमलम्, तदुपास-नया योगाभ्यासेन चापनुद्यते। इति निरदर्शयत् बहुधा, आदित आरभ्य योगाधिकरणपर्यन्तभागेषु तत्र तत्र धर्मस्वरूपमुपासनास्वरूपं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

योगिनामवस्थितिस्वरूपं योगाभ्यासफलस्वरूपं च निपुणतरं प्रत्यपीपदत्। देहेन्द्रियाद्यात्मवादस्य शून्यवादस्य च हेयतां आस्तिकदर्शनोपादेयतां च प्राचीकशन्नास्मिन् ग्रन्थे। किञ्च दृष्टानुश्रविकविषयवैतृष्ण्यदार्ढ्याय जगन्मिथ्यात्वाधिकरणं मायाधिकरणं च निरूपयाम्बभूव, संवित्स्वरूपस्योपाधिमन्तराविभाव्यमानभेदकत्वादाकाशवदेकत्वं सुदृढीचकार तत्रतत्र सयुक्तिकं सोदाहरणं जगतोऽस्थिरत्वं विषयसंबन्धात् जायमानसुखस्य क्षणिकत्वं ब्रह्मसुखस्यैव पुरुषधौरेयैः संपादनीयत्वमाविश्चकार--अत्र च मायास्वरूपज्ञानमिन्द्रियनिग्रहउभयं शरीरेन्द्रियादिव्यतिरिक्तशुद्धात्मस्वरूपावगतौ मुख्यं कारणं मायास्वरूपाज्ञाने मायाकार्यप्रपञ्चाधिष्ठानभूतब्रह्मज्ञानं दुर्घटं इन्द्रियनिग्रहाभावे आत्मस्वरूपजिज्ञासावार्तापि दुर्लभा। कुरङ्गमातङ्गपतङ्गभृङ्गमीनाएकैकेन्द्रियाधीनतया पञ्चत्वं प्राप्ताः पञ्चेन्द्रियाधीनतायां मनुष्यजन्मकृत्यं नैवोत्पद्येत प्रत्युत संसारान्धकूपे पत नमेवप्राप्नोति, तस्मात् वहुपत्नीभिराकृष्यमाणः पतिरिव जिह्वादीन्द्रियगणैरितस्तत आकृष्यमाणः पुरुषः पुरुषार्थात् भ्रश्यमानः कष्टां गतिं प्राप्नुयादिति परमपदवीप्राप्त्यर्थं मार्गदर्शकोऽयं ग्रन्थः पामराणामपि इति निश्चप्रचं वदामो वयम् एतत् बुध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति वचनात् कृतकृत्यतापादकमात्मज्ञानसाधनमयं ग्रन्थसन्दर्भः इति शम्॥

इति पण्डितराज तर्कप्रधानोपाध्याय शङ्करनारायणशास्त्रि विरचितः

चिद्विलास विमर्शः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Padmanabha

mysore

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Sharma

ON INDIA GOVERNMENT SERVICE

CERTIFICATE OF POSTING OBTAINED

BOOK POST

To — M. N. Sankaranarayana Sastri
Thur - palghat
S. Malabar

Maharaja's Sanskrit College.
Mysore.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE